**आरण्यकम्** मार्च 2006

अर्धवार्षिकं संस्कृतशोधपत्रम् आर० एन० आई० सं० 58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मे[illegible]व्य (सभूमिका-हिन्दीपद्यानुवादसहितम्) — स्व० पण्डित कमलाकान्त उपाध्यायः 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक' स्य भोजपुरी-पद्यानुवादः) — श्री देवकुमार मिश्रः 'अलमस्त' 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा — श्री नर्मदेश्वर ओझा 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' — पं० जगदीश्वर प्रसाद मिश्र 'नलिन' 35 रू[illegible]णि
5. भरतचरितम् (महाकाव्यम्) — स्व० भवानीदत्त [illegible]र्मा 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा — श्री नर्मदेश्वर ओझा 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् — पं० व्रजभूषण मिश्र 'आक्रान्तः' 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' — श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह — श्री जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) — स्व० पं० उपेन्द्रनारायणदत्त शर्मा 41 रूप्यकाणि
11. भावनाविलासशतकम् — स्व० पण्डित उपेन्द्रनारायणदत्त शर्मा 21 रूप्यकाणि
12. ह[illegible]च्चरितम् — स्व० पण्डित व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
13. उपनिषदों की भूमिका — पं० जगदीश्वर प्रसाद मिश्र 'नलिन' 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) — स्व० पण्डित वचन मिश्रः
15. त्रिरत्नत्रयी — स्व० पं० व्रजभूषणमिश्र 'आक्रान्तः' 51 रूप्यकाणि
16. जगन्नाथचरितम् — डॉ० बनमाली बिश्वालः 60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण — डॉ० गोपबन्धु मिश्रः

# आरण्यकम्

## अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्

आरा (विहारः)

संस्कृतप्रसारपरिषद्, आरा (विहार)

सरस्वती नः सुभगा मयस्करत्

**मार्च 2006**

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्त्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।

   (क) धनादेश (M. O.) द्वारा शुल्कप्रेषणं **डॉ० गोपबन्धु मिश्रः, रीडर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005** इति नाम्ना करणीयम् ।

   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना 'आरा' (विहारः) नगरे व्यवहरणीयं कृत्वा प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते । अस्वीकृता लेखा निर्धारित 'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
10. 'आरण्यक'सम्बद्धः सर्वविधपत्रव्यवहारः **डा० गोपबन्धु मिश्रः, रीडर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005** इति सङ्केतेन विधेयम् ।

❖

# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् – त्रयोदशम् अङ्कः – प्रथमः

आश्विनः, वि० सं० २०६३

मार्च, २००६

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा

डॉ० हरिहर झा, दरभङ्गा

डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना

डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी

डॉ० राय अश्विनी कुमारः, बोधगया



*संस्थापकः*

स्व० पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*

डॉ० गोपबन्धु मिश्रः

*सह-सम्पादकः*

डॉ० सुनीलकुमार प्रधानः

*प्रकाशिका*

संस्कृतप्रसारपरिषद्

मारुतिमन्दिरम्

प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।


डॉ० गोपबन्धु मिश्रः

सम्पादकः

# सम्पादकीयम्

मानववंशो वर्धते । वर्धमानया संख्यया भारः स्फायते । वसुन्धरा बिभेति, न मानवेभ्यः, अपितु मानवकृतेभ्य इतरप्राणिविनाशकारिभ्यः कार्येभ्यः । सर्वेषां कृते एषा धरित्री, न केवलं मानवानां कृते । किन्तु, मानवः स्वानुकूल्यमेव पश्यति, आत्मरक्षणाय आत्मसुखाय चाऽपरान् जीवान् क्लेदयति नाशयति चाऽपि । मानवस्य रक्षकत्वं भक्षकतां भजते । तस्य सर्वे नियमा उपनियमाश्च केवलम् आत्मकेन्द्रं परितो भ्रमन्ति । तेन कारणेन अगाधजलसञ्चारिणो जलजीवाः त्रस्यन्ति, नभश्चरा बिभ्यति, कुक्कुटशावकादारभ्य हस्तिनं यावत् निखिला भूतलवासिनो मानवेतराः प्राणिनो निरीहन्ते । इतरेषां स्थावरजङ्गमानां विनाशं कुर्वाणो मानवो मनागपि नावसीदति । तादृशविनाशनप्रवृत्त्या एष स्वजातीयान् मानवानपि हन्तीति महती अनर्थपरम्परा प्रवर्तमाना दृश्यते । एतदनर्थस्य दूरीकरणं परस्परं सद्भाव-सहावस्थानबोधविकासद्वारैव सम्भाव्यते-तदुक्तं गीतायाम् -

**'परस्परं भावयन्तः श्रेयः परमवाप्स्यथ'** गीता (3.11)

अर्थात् मानवकल्याणं मानवेतरकल्याणसापेक्षम् इति मानवो विस्मरति।

एतद् विस्मरणं कथम् ? वस्तुतः वंशो द्विधा-विद्यया जन्मना-च, तत्र भवो वंश्यः' इति श्रीमद्भट्टोजिदीक्षितः सिद्धान्तकौमुद्यां 'संख्या वश्येन' (2.1.1) इति व्याख्यायां वक्ति । काशिकाकारस्तत्र आह-'विद्यया जन्मना वा प्राणिनामेकलक्षणसन्तानो वंश इत्यभिधीयते' इति। एतद्व्याख्यानुसारं मानववंशस्य द्विविधा धारा विद्यते-एका तु जन्मना वर्धते । जनगणनाऽवसरे तस्या एव गणना भवति । किन्तु अपरा धाराऽस्ति विद्यावंशगता । विद्यया ज्ञानेन सदसद्विवेकेन वा यो मानवः अभिवृद्धिं प्राप्नोति स सर्वेषां कल्याणचिन्तनं करोत्येव । एतया विद्यया मानवस्य संख्यात्मिका वृद्धिर्नैव जायते, अपितु तस्य गुणात्मको विकासो भवति । जन्मवंशजो मानवः तदितरप्राणिवत् सामान्यः देहैकाभिमानी भवति । यदि एष विद्यावंशजो

भवति तर्हि तेन जन्मवंशजस्य मानवस्यापि संरक्षणं सम्भाव्यते । जन्मवंशजानां मानवानां वृद्ध्या ध्वंसभीतिः प्रभवति, किन्तु विद्यावंशजानां मानवानां समृद्ध्या सर्वेषां निर्माणं रक्षणं कल्याणं च संसाधयितुं शक्यते । अतः जन्मादिषड्विकारयुतं मानवजीवनं कृत्याकृत्यप्रवृत्तिनिवृत्तिरूपविद्याव्यवहारयुक्तं सदैव प्रवर्तेत । तदानीमेव तादृश्या विद्यावंशगतमानवाभिवृद्धेः कारणेन सर्वेषां हितमेव संसाध्येत ।

अतो विद्यावंशस्याभिवृद्धेः उपायः अन्वेष्टव्यः । तत्र गीतोक्तिर्विद्यते–

**"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥"**

(गीता 16.24)

शास्त्रप्रमाणमाश्रित्य कर्मनिश्चयः कर्तव्यः, तस्मिन् कर्मणि च मानवाः प्रवर्तेरन् । तेनैव विद्यावंशो वर्धेत, विद्यावंशाभिवर्धनेन मानवस्य जन्मवंशः संरक्ष्येत इत्यभीष्टपरम्परा सम्पाद्या भवेत् ।

आरण्यकम् इदं तादृशं शास्त्रप्रमाणम् अन्वेष्टुं प्रवर्तते । गते २०६२ तमे वैक्रमे संवत्सरे आरण्यकस्य अङ्कद्वयम् (मार्च 2005 तथा च सितम्बर 2005) अपरिहार्यकारणवशतः प्रकाशितं नाऽभवत् इति सखेदं वदामः । इतः परमेतत् शोधपत्रं विविधशास्त्रनिष्ठानां विषयाणां सप्रमाणं प्रस्तुतये आत्मानं यथोचितं योजयेदित्येतदर्थं भगवान् विश्वनाथः भगवती अन्नपूर्णा च कार्येऽस्मिन् कृपां विधत्ताम् इति सम्प्रार्थये ।

**गोपबन्धुमिश्रः**
सम्पादकः

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. उत्तररामचरिते मानवेतरतत्त्वानि | डॉ० रत्नमोहनः झा<br>प्रवक्ता, राष्ट्रीयसंस्कृतसंस्थानम्<br>गरलीपरिसरः, हिमाचलप्रदेशः | १ |
| 2. अष्टाध्याय्याः परिभाषासूत्राणि | डॉ० श्रीप्रकाशपाण्डेयः<br>प्रवक्ता, स्नातकोत्तरसंस्कृतविभागः<br>बा० आम्बेदकरबिहारविश्वविद्यालयः<br>मुजफ्फरपुरम् (विहारः) | ११ |
| 3. अद्वैतवेदान्तशास्त्रे "अधिकारी" | डा० सुकान्तकुमारसेनापतिः<br>उपाचार्यः, राष्ट्रिसंस्कृतसंस्थानम्<br>सदाशिवपरिसरः, पुरी (ओड़िशा) | १५ |
| 4. वाल्मीकिरामायणे प्राशासनिकसमीक्षा | डॉ० व्रजकिशोरस्वाईं<br>आचार्यः, धर्मशास्त्रविभागः<br>श्रीजगन्नाथसंस्कृतविश्वविद्यालयः<br>पुरी (ओड़िशा) | २१ |
| 5. आधुनिकयुगे आयुर्वेदस्य वैशिष्ट्यम् | डा० अर्चनाकुमारी दूबे<br>प्रवक्त्री, संस्कृतविभागः<br>वनस्थलीविद्यापीठम्, राजस्थानम् | ३१ |
| 6. ध्वनौ वक्रोक्तेरन्तर्भावसमीक्षणम् | डा० मृदुला रायः<br>उपाचार्या, संस्कृत-पालिविभागः<br>विश्वभारती, शान्तिनिकेतनम् | ३५ |

| | | | |
|---|---|---|---|
| 7. | श्रीमद्भगवद्गीतायां सादृश्यकथनम् | डा० मञ्जू कुमारी वाराणसी | ४७ |
| 8. | व्यक्तिविवेके निपातोपसर्गयोः वाचकत्वद्योतकत्वविमर्शः | डा० अरुणकुमारमण्डलः उपाचार्यः, संस्कृतपालिविभागः विश्वभारती, शान्तिनिकेतनम् | ५३ |
| 9. | भासनाटकेषु प्राकृतिकबिम्बानां विमर्शः | विनय कुमार पाण्डेयः शिक्षकः, डी. ए. वी. पब्लिक स्कूल मोकामा (पटना) | ६७ |
| 10. | पुस्तकसमीक्षा शतदलम् | समीक्षक :- अरुण कुमार मिश्र पुस्तकम् - डॉ० रवीन्द्र कुमार पण्डा | ७१ |


# उत्तररामचरिते मानवेतरतत्त्वानि

डॉ० रत्नमोहनः झा

अनादिकालादेव मानवेन सह मानवेतरतत्त्वानां गहनसाहचर्यं विद्यते। अनायासेनैव मनुष्याणां भावप्रवाहे मानवेतरतत्त्वानां दिव्याऽदिव्यरूपाणां समाहारः जातः अस्ति। एतानि तत्त्वानि विना अस्माकं जीवनस्य कल्पनापि अशक्या इति भाति। संस्कृतकवयः चिरन्तनसत्यमेतत् अतीव भावुकतया कलात्मकतया च स्वीये काव्ये मुखरितं कृतवन्तः सन्ति। काव्येषु नाटकेषु वा मानवेतरचित्राणां कलात्मकारोपाणाम् उद्देश्यं तु समानमेव भवति। पाठकानां सामाजिकानाञ्च मनसि कस्याश्चित् भावस्थितेः चित्रात्मकता पूर्णरूपेण मूर्ता स्यादित्येव काव्यनाटकेषु विद्यमानमानवेतराणामुद्देश्यं भवति। संवेगस्य किम्वा भावुकतायाः क्षणे मानवेतरैः साकं मानवानां साहचर्यम् अधिकं सघनं भवति। फलतः मानवीयभावानां मानवेतरैः सह परस्परम् आरपप्रत्यारोपभावः अवश्यम्भावी भवत्येव।

यद्यपि श्रव्यकाव्यसदृशं दृश्यकाव्ये मानवेतरतत्त्वचित्रणस्य अधिकावसरः कविना नैव लभ्यते। महावीरचरिते भवभूतिना संक्षेपेण मानवेतरतत्त्वचित्रणं कृतमस्ति। मालतीमाधवप्रकरणे मानवेतरतत्त्वानां कठोररूपस्य चित्रणं कृतं विद्यते। नाटकस्य घटनाचक्रप्रवर्तने सर्वथा स्वाभाविकरूपेण निसर्ग-निरूपणं विद्यते। कुत्रापि कृत्रिमरूपेण मानवेतरतत्त्वानां सन्निवेशः नैव दृश्यते। प्रकरणेऽस्मिन् पर्वत-सूर्य-चन्द्र-वृक्ष-पुष्प-धरा-समुद्र-खग-मृग-ऋतु-ग्रहनक्षत्र-पिशाचादीनाञ्च उल्लेखः अतीव समीचीनतया कृतः वर्तते।

भवभूतेः कृतिषु रागयुक्तप्रेमिहृदयस्य उदात्तानुभूतीनां प्रकटने मानवेतरतत्त्वानां विलक्षणं योगदानं विद्यते। भवभूते भावुकः माधवः

क्वचित् रक्तपुष्पस्य स्पर्शेन मालत्याः करस्पर्शसुखमनुभवति । मालत्याः हस्तस्य रक्ततां, अङ्गुल्याः कोमलतां, भुजायाः मनोहरताञ्च सः रक्तपङ्कजे पश्यति –

आमूलकण्टकिकोमलबाहुनाल-
मार्दाङ्गुलीदलमनङ्गनिदाघतप्तः ।
अस्याः करेण करमाकलयामि कान्त-
मारक्तपङ्कजमिव द्विरदः सरस्याः ।।[1]

अपरत्र च मानवेतरतत्त्वानां भयङ्कररूपस्यापि वर्णनं दृश्यते –

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ।।[2]

महावीरचरिते मानवेतरतत्त्वानि स्वल्पानि, मालतीमाधवे च विस्तृतानि सन्ति चेत् उत्तररामचरिते नाटकीयदृष्ट्या मानवेतरतत्त्वानां योजना सन्तुलिता व्यवस्थिता च अस्ति । मानवेतरतत्त्वानि प्रति कवेः एतादृशी प्रौढा दृष्टिः वस्तुतः तस्य साहित्यिकजीवनस्य तादृशं विकासं सूचयति यत्र सः स्वकलायाम् अनुभूत्याञ्च चरमबिन्दून् प्राप्तवानासीत् उत्तररामचरितस्य प्रकृतिः सर्वविधदृष्ट्या वस्तुनेतारसानाञ्च अनुषङ्गिणी च दृश्यते । कविः अस्मिन् पूर्वतनापेक्षया विलक्षणं वस्तु संस्थाप्य तदनुसारमेव रस-योजनायाञ्च साफल्यं प्राप्तवानस्ति ।

महाकविकालिदासः इव भवभूतिरपि स्वीये नाटके मानवेतरतत्त्वानां तानि तानि रूपाणि चित्रितवान् अस्ति । तत्र स्वेदजोद्भिज्जाण्डजानतिरिच्य पञ्चमहाभूतानि जडचेतनतत्त्वानि च विद्यन्ते । एकैकस्यापि तत्त्वस्य उत्कृष्टं चित्रमुपस्थापितवानस्ति कविः ।

**पर्वताः**

उत्तररामचरिते वनस्थानेषु चत्वारः पर्वताः चर्चिताः सन्ति । तेषु प्रस्रवण-माल्यवान्-विन्ध्याटवी-जटायुशिखराश्च सन्ति । प्रथमे अङ्के चित्रदर्शनसमये सीतां चित्रं दर्शयन् लक्ष्मणः निगदति यत् –



अयमविरलानोक हनिवहनिरन्तरस्निग्धनील-
परिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः ।
सततमभिष्यन्दमानमेघमेदुरितनीलिमा
जनस्थानमध्यगो गिरिः प्रस्रवणो नाम ।

इतोऽपि तस्मिन् पर्वते लक्ष्मणद्वारा कृतां सेवां स्मरन् कथयति –

स्मरसि सुतनु ! तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्यासुस्थयोस्तान्यहानि ।
स्मरसि सरसनीरां तत्र गोदावरीं वा स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ।।[3]

द्वितीये अङ्के यदा शम्बूकवधनिमित्तं रामः वनं गच्छति तदा तत्रत्यं दृश्यं दृष्ट्वा पुनरेकवारं पर्वतस्य स्मरणं कृत्वा श्रीरामः कथयति –

एते ते एव गिरयो विरुवन्मयूरास्तान्येव मत्तहरिणानि वनस्थलानि ।
आमञ्जुवञ्जुललतानि च तान्यमूनि नीरन्ध्रनीलनिचुलानि सरित्तटानि ।।[4]

**नद्यः**

भवभूतेः नाटके नद्यः प्रकृतेः न केवलम् अङ्गभूताः सन्ति अपितु साक्षात्पात्ररूपेण दायित्वं निर्वहन्ति । नाटके गङ्गा-यमुना-गोदावरी-सरयू-तमसा-मुरलाश्च मञ्चस्थं पात्रत्वं वहन्ति । एतासां स्थाने मानवाः अभविष्यन् चेत् कदाचित् तादृशप्रभाविभूमिका नाभविष्यदिति मन्ये ।

प्रथमे अङ्के चित्रदर्शनप्रसङ्गे एव सुरनद्याः गङ्गायाः दर्शनं भवति । तां दृष्ट्वा सीता कथयति यत् एषा प्रसन्नपुण्यसलिला भागीरथी । तदा रामः नमस्कृत्य गङ्गां कथयति –

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात् प्लुष्टान् पुरा प्रपितामहान् ।
अगणिततनूतापं तप्त्वा तपांसि भगीरथो
भगवति ! तव स्पृष्टानद्भिश्चिरादुददीधरत् ।।[5]

सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव ।

चित्रदर्शनसन्दर्भे एव सीता श्रान्ता सती पुनरेकवारं गङ्गावगाहनस्य अभिलाषां प्रकटयति । वस्तुतः भवभूतिः अनेन वाक्येनैव नाटकीयं भवितव्यं प्रकटयति । अतीव कुशलतापूर्वकं वस्तुयोजना अत्र समाहिता अस्ति । सीता कथयति –

"जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहृत्य पवित्रनिर्मलशिशिर-सलिलां भगवतीं भागीरथीमवगाहिष्य इति ।"

तृतीये अङ्के मञ्चस्योपरि द्वे नद्ये उपस्थिते भवतः । तयोः एका तमसा अपरा मुरला च । मुरला स्वीयां सखीं तमसां सम्बोध्य कथयति यत् अहं भगवत्याः लोपामुद्रायाः आज्ञानुसारं गोदावर्याः कृते सन्देशं सूचयितुं गच्छामि । सरयूगोदावरीत्यनयोः नद्योः अपि चर्चा अत्र तमसा-मुखात् श्रूयते -

"इदानीं तु शम्बूकवृत्तान्तेन सम्भावितजनस्थानागमनं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्कया सीता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता ।"

वृक्षाः

महाकविः भवभूतिः नववृक्षाणाम् उल्लेखं विंशतिस्थानेषु उत्तररामचरितनाटके कृतवानस्ति । तेषु वटः कदम्बः जम्बूः सल्लकी कदली अश्वत्थः सालः बकुलः चन्दनश्च विद्यन्ते ।

नाटकस्य प्रथमे अङ्के चित्रदर्शनसमये सीतारामलक्ष्मणाश्च परस्परं पूर्वघटनां दर्शयन्तः स्मारयन्तश्च सन्ति । तत्रैव लक्ष्मणः मन्थरायाः वृत्तान्तं दर्शयति । तस्मिन् सन्दर्भे शृङ्गवेरपुरस्थितस्य इङ्गुदीनामकस्य तापसतरोः वर्णनं दृश्यते ।[6]

द्वितीये अङ्के वनदेवता तापस्याः स्वागतं करोति । सा प्रसन्नमनसा वक्ति यत् अस्मिन् वने सर्वमपि भवती उपभोक्तुं शक्नोति । अद्य मम शुभदिनमस्ति, यतो हि सज्जनानां दर्शनं पुण्यप्रभावादेव भवति । अत्र वृक्षस्य छाया, जलं भोजनादि च भवत्याः उपयोगाय अस्ति । अस्मिन् वचने वृक्षस्योल्लेखः दृश्यते -

यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥[7]

तृतीये अङ्के नेपथ्ये आक्रान्तगजशावकस्य समाचारः श्रूयते ।



तस्मिन् श्लोके सल्लकीवृक्षस्य उल्लेखः अस्ति । यथा -

"सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रैः ................"

पञ्चवटीमागतस्य रामस्य स्वागतार्थं सीतायाः आत्मीया सखी वनदेवी वासन्ती स्वयंसिद्धा दृश्यते । सा वृक्षं निवेदयन्ती कथयति यत् हे मकरन्दस्राविणः तरवः ! रामः अद्य स्वयमत्र समागतोऽस्ति । अतः भवन्तः पुष्पैः फलैश्च अर्घ्यं यच्छन्त्विति ।[8]

चन्द्रः

नाटकेऽस्मिन् नवस्थानेषु चन्द्रस्योल्लेखः अस्ति । कुत्रचित् विस्तृतरूपेण कुत्रचिदांशिकरूपेण च चन्द्रस्य वर्णनं लभ्यते । तृतीयाङ्के द्वादशवर्षाणां पश्चात् पञ्चवट्यां सीता यदा रामं पश्यति तदा रामस्य दौर्बल्यं कान्तिहीनताञ्च दृष्ट्वा स्वयमेव मूर्च्छिता भवति । तस्मिन् समये सीतायाः वाक्ये चन्द्रस्य उल्लेखः श्रूयते -

"हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलेनाकारेणायं निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञातव्य आर्यपुत्र एव । भगवति तमसे ! धारय माम् ।"

तृतीयाङ्के तमसा सीतां वदति यत् हे पुत्रि ! चलतु, इतः परं पुत्रयोः माङ्गलिककार्यनिमित्तं गच्छावः । तदा सीता अतीव दुःखिता भवति। सा कथयति यत् दुर्दिने पूर्णचन्द्रस्य दर्शनं कदाचिदेव भवति । तथैव मम दुर्भाग्यरूपमेघेनाच्छादितस्य रामस्य दर्शनं क्षणार्थम् एव अभवत् । इतोऽपि अधिकं कथं वा स्यात् -

"कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम् ।"

पञ्चमे अङ्के लवस्य दृष्टिः बलादिव चन्द्रकेतौ आकृष्टा भवति । मनश्च प्रमुदितं भवति । तत्र लवः उत्तमोपमया चन्द्रस्य कुमुदिन्याश्च उदाहरणं प्रस्तौति -

यथैन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन् दृष्टिर्मम, कलहकामः पुनरयम् ।
रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्बणरसः ॥[9]

### सूर्यः

उत्तररामचरिते मानवेतरतत्त्वेषु सूर्यस्य वर्णनं बहुत्र दृश्यते । रामचन्द्रः नाटकस्यास्य नायकः विद्यते । सः च सूर्यवंशीयः । अतः अनेकेषु स्थलेषु सूर्यवंशस्य वर्णनप्रसङ्गे सूर्यपदस्य प्रयोगः प्राप्यते । अन्यच्च स्वतन्त्ररूपेणापि सूर्यस्योद्धरणं कविना अत्र प्रकटितमस्ति । चन्द्रकेतुलवयोः युद्धकाले विद्याधरः पत्न्या सह विचरणे चन्द्रकेतुना प्रयुक्तस्य आग्नेयास्त्रस्य प्रभावेण परिवर्तितं वातावरणं पश्यति । तदा सः रुद्रस्य ललाटस्थस्य नेत्रस्य तोलनं सूर्येण सह करोति ।[10]

रामस्य पुरतः लवः स्वकृतव्यवहारार्थं क्षमां याचते । रामः लवं तस्यापराधं पृच्छति । तदा चन्द्रकेतुः प्रसन्नमनसा लवस्य वीरोचितमाचरणं श्रावयति । सर्वमपि विषयमवगत्य रामः लवं सान्त्वयन् सूर्यस्योदाहरणं प्रस्तौति । श्लोकेऽस्मिन् सूर्यस्य सूर्यकान्तमणेश्च समीचीनं चित्रम् उपस्थापितमस्ति –

न तेजस्तेजस्वी प्रसृतमपरेषां विषहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ।।[11]

### पुष्पाणि

महाकविः भवभूतिः कमलकेतकीकौमुदी–कोविदार–पलाशपुष्पाणि च त्रयोविंशतिस्थानेषु उद्धृतवानस्ति ।

प्रथमाङ्के सीतायाः मनोरञ्जनार्थं लक्ष्मणेनानीतस्य चित्रस्य अग्निशुद्धिपर्यन्तमिति विषयं श्रुत्वा, रामः सीतायाः दुःखमवगत्य कथयति यत् सुगन्धितानि पुष्पाणि जनैः शिरसि धार्यन्ते तेषामुपरि चरणप्रहारः नैव क्रियेत ।[12]

द्वितीयाङ्के तापसी यदा वाल्मीकेः आश्रमं परित्यज्य दर्शनशास्त्रमध्येतुम् अगस्त्याश्रमं गच्छन्ती अस्ति, तदा मार्गे एव पञ्चवट्यां फलपुष्पाणां शोभामवलोक्य वदति यत् वनदेवी मम सत्कारार्थं सिद्धा दृश्यते –



"अये ! वनदेवता फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामुपतिष्ठते ।"

सीताविषयकं रामस्य सन्तापं रोदनञ्च दृष्ट्वा तमसा अतीव मर्मान्तिकारकं वचनं ब्रूते । सा वदति यत् दुःखं न्यूनीकर्तुं रोदनं विहाय नान्यः मार्गः । किन्तु सीताविषयकः शोकः रामस्य जीवनं तथैव म्लानं करोति यथा आतपः पुष्पं ग्लपयति ।[13]

### पृथिवी

पृथिवी वस्तुतः मानवेतरतत्त्वेष्वेव समाहिता भवति, किन्त्वत्र मानवीयपात्रस्य भूमिकां निरूढवती अस्ति । पृथिव्याः भूमिका पूर्णतः मानवीयसंवेदनया आप्लाविता अस्ति । प्रथमे अङ्के दुर्मुखात् सीताविषयकं प्रवादं श्रुत्वा हतप्रभः रामः तस्याः चरणयोः प्रणम्य स्वीयां मनोव्यथां प्रकट्य अन्ततः भगवतीं वसुन्धरामेव निवेदयति –

"भगवति वसुन्धरे ! सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।"

द्वितीये अङ्के आकाशवाणीद्वारा शम्बूकस्य प्रसङ्गे पृथिव्याः उच्चारणं श्रूयते । आकाशवाण्याम् उच्यते यत् शम्बूकनामकः शूद्रः पृथिव्यां तपः कुर्वन्नस्ति । अतः तस्य उद्धारं कृत्वा भवान् ब्राह्मणशिशुं जीवयतु ।

सप्तमे अङ्के गर्भनाटके पृथिवी अत्यन्तं प्रभावयुक्तभूमिकां कृतवती अस्ति । अद्यापि लोके विवाहितां पुत्रीं दुःखितां दृष्ट्वा का च माता कम्पिता न स्यात् ? एवमेव पुत्र्याः सीतायाः दुःखं दृष्ट्वा पृथिवी मूर्च्छिता भवति । तस्याः हृदयविदारकं वचनं श्रुत्वा दर्शकानाम् अपि नेत्रे अश्रुपूरिते भवतः ।

### मेघः

सप्तसु स्थानेषु मेघस्योल्लेखः दृश्यते अस्मिन्नाटके । द्वितीये अङ्के रामचन्द्रेण प्रस्रवणपर्वतः मेघपङ्क्तिरिव नीलवर्णः दृश्यते । सः मेघमुच्चारयन् कथयति –

मेघमालेव यश्चायमारादपि विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ।।[14]

चतुर्थे अङ्के लवः धनुषि प्रत्यञ्चां स्थापयन् कथयति यत् अस्य धनुषः रवः भीषणमेघस्य इव स्यात् ।

पञ्चमे अङ्के युद्धरतस्य लवस्य शोभां निरूपयन् चन्द्रकेतुः आर्यसुमन्त्रं कथयति यत् हे आर्य ! पश्यतु वायुप्रभावात् चञ्चल इन्द्रधनुर्युक्तो मेघः इव चापयुक्तोऽयं बालः शोभते ।[15]

अपरत्र षष्ठे अङ्के चन्द्रकेतुलवयोः प्रवृत्ते घोरयुद्धे दुन्दुभेः ध्वनिः मेघगर्जनमिव गम्भीरायते ।[16]

खगाः

उत्तररामचरिते मयूर-क्रौञ्च-कङ्क-गृध्रानाञ्च चतुर्णां खगानाम् उपविंशतिवारं वर्णनं लभ्यते । द्वितीये अङ्के आत्रेयी वनदेव्यै वाल्मीक्याश्रमस्य कथां श्रावयति । तस्मिन्नेव सन्दर्भे क्रौञ्चनामकखगस्य उल्लेखः श्रूयते । सा वदति -

"अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुपपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन वध्यमानं ददर्श आकस्मिकप्रत्यवभासां देवीं वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत् ।" अपि च –

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।[17]

चित्रदर्शनसन्दर्भे रामः वनवासकालं स्मृत्वा गृध्रराजस्य उल्लेखं करोति ।

पुनश्च, तृतीयाङ्के रामस्य रवं एवं श्रुत्वा सीता आश्चर्यचकिता विस्मता च भवति । सा चकिता मयूरी इव इतस्ततः पश्यति । तां सम्बोधयन्ती तमसा कथयति, अयि वत्से ! -

अपरिस्फुटनिस्वाने कुतस्त्येऽपि त्वमीदृशी ।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता ।।[18]

मृगाः

उत्तररामचरिते दश पशवः सप्तविंशतिस्थानेषु वर्णिताः सन्ति । तेषु गजः अश्वः सिंहः हरिणः भल्लूकः वानरः वृषः अजः कुक्कुरः गर्दभश्च विद्यन्ते । तृतीयाङ्के गजशावकस्य मदमत्तस्य गजस्य च द्वयोरपि चित्रणं लभ्यते । नेपथ्ये श्रूयते यत् वनवाससमये सीतादेवी स्वहस्तेन



पल्लवान् खादयित्वा यं गजशावकं पोषितवती तमेव कश्चन मदमत्तः गजः आक्रान्तवानस्ति ।[19]

तं दृष्ट्वा सीता कामयते यत् एषः गजशावकः दीर्घायुः भूत्वा प्रियतमया अविरहितः भवेत् । तत्रैव रामः वासन्तीं कथयति – सखि वासन्ति ! पश्य, पश्य कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन । अपि च -

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसङ्क्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ।।[20]

हरिणस्योल्लेखं करोति सीतायाः प्रियसखी वासन्ती । रामम् उपवेश्य पूर्वतनघटनां स्मारयन्ती सा वदति -

एतत्तदेव कदलीवनमध्यवर्ति-
कान्तासखस्य शयनीयशिलातलं ते ।
अत्र स्थिता तृणमदाद् बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ।।[21]

काव्येषु मानवेतरतत्त्वानां वर्णनं प्रधानतः अङ्गत्वेनैवायाति । मानवेतरतत्त्ववर्णनेन कवेः प्रकृतेः ज्ञानं भवति । मानवेतरतत्त्वानां सर्वाणि रूपाणि कवेः वर्ण्यविषयत्वेन भवन्ति । कदाचित् तत्र सुन्दरासुन्दरयोः वा भेदः न भवति । वापीतडागोद्यानानां खगमृगवनमरुभूमीनां वर्णनेऽपि कवेः समाना रुचिः स्यात् । अनया दृष्ट्या पश्यामश्चेत् भवभूतिः उत्कृष्टरुचि-सम्पन्नः कविः प्रतीयते ।

महाकविभवभूतिः मानवेतरतत्त्वानां कुशलतापूर्वकं विषयान् चित्वा तेषां साफल्येन वर्णनं कृतवानस्ति । तेषां भयानकोग्रविषमरूपेष्वेव भवभूतेः दृष्टिः अस्ति । कविः प्रकृतेः अलङ्कृतरूपेषु विचरणं नैव कृतवान् । अतः तस्य वर्णने यथार्थता अस्ति । भवभूतिः मानवेतरतत्त्वानां हार्दिकरूपेण दर्शनं कृत्वा जनानपि दर्शितवानस्ति ।

सन्दर्भसूची

1. मालतीमाधवम्,
2. उत्तररामचरित, 2/16
3. ,, 1/27
4. ,, 2/23
5. ,, 1/23
6. ,, 1/81, 'इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।'
7. ,, 2/1
8. ,, 3/24, ददतु तरवः पुष्पैरर्घ्यं...........।।'
9. ,, 5/26
10. ,, 6/3
11 ,, 6/14
12. ,, 1/14, 'नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा......।'
13. ,, 3/30
14. ,, 2/24
15. ,, 5/11
16. ,, 6/12
17. ,, 2/5
18. ,, 3/7
19. ,, 3/6
20. ,, 3/16
21. ,, 3/21


* * *



# अष्टाध्याय्याः परिभाषासूत्राणि

डॉ० श्रीप्रकाशपाण्डेयः

पाणिनेः परिभाषासूत्राणि अष्टाध्यायीं सारवतीं कर्तुं संज्ञासूत्राणि इव उपयोगीनि सन्ति । अष्टाध्यायीकलेवरं संश्लिष्टं सुबोधञ्च विधातुं संज्ञापरिभाषयोः उभयविधसूत्रयोः समानं श्रेयः अस्ति । संज्ञापरिभाषयोः एकवाक्यताकारणतः अष्टाध्याय्याम् उभयविधसूत्रयोः पाठः एकत्र कृतोऽस्ति । "यथोद्देशं संज्ञापरिभाषम्" तथा "कार्यकालं संज्ञापरिभाषम्" इति परिभाषाद्वयमपि संज्ञापरिभाषयोः समरूपतां द्योतयति । गुणवृद्धीति सार्वदेशिकसंज्ञानां बोधस्य अनन्तरमेव इको गुणवृद्धी इति परिभाषायाः अर्थावगमनं शक्यमस्ति, अतः अष्टाध्याय्याम् अनयोः क्रमिकपाठः महत्त्वपूर्णः अस्ति । पाणिनिपद्धतेः प्रक्रियाग्रन्थेषु संज्ञापरिभाषयोः वैज्ञानिकसम्बन्धम् अनवलोक्यैव तयोः पाठः पृथक् पृथक् कृतोऽस्ति । इदमेव कारणं यत् प्रक्रियाग्रन्थद्वारा शब्दसाधुत्वे किञ्चित् सौकर्यम् अवश्यं भवति किन्तु पाणिनेः वैज्ञानिकताम् अवगन्तुं काठिन्यम् अनुभूयते । संज्ञासूत्रं तथा च परिभाषासूत्रं परस्परं पूरकम् अतः पाणिनितन्त्रं प्रकाशयितुम् उभयोः समानं महत्त्वमस्ति । तत्प्रतीत्यर्थं च तयोः एकत्र पाठः कृतः अस्ति । परिभाषासूत्राणां पाणिनीयतन्त्रप्रकाशकतासम्बन्धे अभियुक्तानामेतद्वचनं सर्वथा न्याय्यमस्ति यत्" कश्चिदेकदेशस्थः सर्वशास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति (महाभाष्यम् 1.4.49) इको गुणवृद्धी इति परिभाषायाः अभावे सार्वधातुकार्धधातुकयोः प्रभृतिसूत्रेषु गुणस्य स्थानिबोधः सम्भवः नास्ति तद्वत् मिदचोऽन्त्यात्परः, अनेकाल्शित्सर्वस्य, ङिच्च, आद्यन्तौ टकितौ इत्येतासां परिभाषाणाम् अभावे नुम् नुट् वुक् प्रभृत्यागमानां स्थानिनिर्णयः कर्तुं न शक्यते । एवमेव तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषाऽभावे इको यणचि इत्यादिविधिसूत्राणाम् अर्थबोधः सम्भवः नास्ति न तु तस्मादित्युत्तरस्य इति परिभाषाऽभावे उदः स्थास्तम्भोः पूर्वस्य इति सूत्रस्य

लक्ष्यं स्पष्टं भवति ।

केषाञ्चन सूत्राणां तु वास्तविकसूत्रप्रकारनिर्धारणेऽपि कठिन्यम् अनुभूयते । निष्कर्षरूपेण परिभाषासूत्राणि पाणिनीयतन्त्रम् अवगन्तुं कुञ्चिका इव सन्ति विस्मृतायाञ्च तस्यां न तु तालम् उद्घाटयितुं शक्यते न तु गृहे प्रवेष्टुं शक्यते ।

पाणिनेः अधिकारसूत्राणि अपि अष्टाध्यायीं संश्लिष्टां कुर्वन्ति । पाणिनिना स्वयं सूत्रप्रकारः न निर्दिष्टः चेदपि अधिकारसूत्राणां स्वरूपनिर्धारणं कठिनं नास्ति । वामनजयादित्यसदृशाः टीकाकाराः अपि कतिपयानां सूत्राणां प्रकृतिनिर्धारणे सन्देहं प्रकटयन्ति, अतएव तैः "अधिकारः परिभाषा वा" इति सूत्रवृत्तिं लिखित्वा तत्त्वरूपनिर्णयदायित्वं पाठकानामुपरि निक्षिप्तं किन्तु परिभाषाधिकारयोः पारार्थ्यरूपसादृश्यं सदपि उभयोः एकं भेदकं तत्त्वम् अवश्यं दृश्यते तन्नाम अधिकारसूत्रस्य प्रदेशभूतविधिसूत्रेषु प्रायः क्रमिकता भवति, अधिकारसूत्राणां स्थितिः विधिसूत्रेभ्यः प्राक् भवति । अधिकारसूत्रगतिः प्रायः मण्डूकप्लुत्या न भवति । उदाहरणार्थं प्राक्कडारात्समासः इत्यस्य अधिकारः 'कडाराः कर्मधारये' सूत्रपर्यन्तं गच्छति । प्राग्रीश्वरान्निपाताः इति सूत्रस्य अधिकारः अधिरीश्वरे इति सूत्रं यावत् गच्छति । परिभाषासूत्राणां विषये एवं न दृश्यते तेषां लक्ष्यभूतविधिसूत्राणि क्रमबद्धरूपेण उत्तरवर्तीनि स्युः इत्येवं न दृश्यते । इको गुणवृद्धी इति सूत्रानन्तरं पठितानि सूत्राणि अन्यानि सन्ति । उक्तपरिभाषायाः प्रसिद्धं सूत्रं "सार्वधातुकार्धधातुकयोः" इति सूत्रं सप्तमे अध्याये पठितम् । "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषासूत्रं प्रथमाध्यायस्य प्रथमे पादे पठितं किन्तु एतस्य विधिप्रदेशः "इको यणचि" इति षष्ठे अध्याये पठितमस्ति । एतदेव तथ्यं लक्ष्यीकृत्य प्रोक्तं यत् "परिभाषा एकदेशस्था सर्वशास्त्रमभिज्वलयति प्रदीपवत् ।" परिभाषाधिकारयोः सर्वाधिकम् उपयुक्तं भेदकतत्त्वम् एतदेव भवितुमर्हति ।

परिभाषासूत्राणां विनियोगसम्बन्धेऽपि अवधानता आवश्यकी । यत्र कुत्रापि सप्तम्यन्तपदं दृष्ट्वा तस्मिन्निति निर्दिष्टे पूर्वस्य इति सूत्रस्य विनियोगः कर्तुं न शक्यते न तु यत्किमपि टितं दृष्ट्वा आद्यन्तौ टकितौ इति सूत्रमाध्यमेन तस्य आदौ स्थापनं कर्तुं शक्यते । ल्युट्प्रत्ययोऽपि टित् अस्ति किन्तु ल्युट् प्रत्ययः अस्ति न तु आगमः तस्य विधानं "प्रत्ययः



परश्च" इत्यनयोः अनुसारं धातोः परे एव भविष्यति न तु आदौ । लक्षणैकचक्षुष्केन परिभाषासूत्राणां विनियोगे काठिन्यम् अनुभवितुं शक्यते, अतः पाठकेन लक्ष्यैकचक्षुष्कदृष्ट्या अष्टाध्यायी अध्येतव्या ।

षष्ठी स्थाने योगा इति सूत्रस्य भाष्ये पतञ्जलिना अधिकारशब्देन परिभाषापि गतार्था । अधिकारपरिभाषयोः स्वरूपविवेचनेन इदं स्पष्टं ज्ञायते यत् अधिकारः परिभाषा च उभयं परार्थकत्वात् एकं प्रतीयमानं भवति तथापि तदयं वस्तुतः पृथक् पृथक् अस्ति यतो हि परिभाषा अधिकारश्च प्रतियोगे उपस्थाय विधिसूत्राणि उपकरोति, अतः अधिकार-परिभाषयोः आपाततः अभेदप्रतीतिः भवति ।

परिभाषालक्षणनिर्धारणसन्दर्भे उक्तम् – "परितो व्यापृता भाषा परिभाषा" (न्यास २.१.१)

दुर्गसिंहः कातन्त्रसूत्रवृत्तौ परिभाषां परिभाषते-

"विधौ नियमकारिणी परिभाषा ।"

प्रकारान्तरेण अभियुक्तैः उक्तम् –

"अनियमे नियमकारिणी परिभाषा"।

एतस्य कथनस्य पृष्ठतः काशिकोक्तं वचनं द्रष्टव्यम् –

"परिभाषेयं स्थानिनियमार्था । अनियमप्रसङ्गे नियमो विधीयते ।"

(काशिका 1.1.3)

पाणिनिः विधिसूत्राणां नियमनहेतोः परिभाषासूत्राणि अरचयत् यानि अष्टाध्याय्यां यत्र तत्र विकीर्णानि सन्ति । परिभाषासूत्राणि विधिसूत्राणाम् अर्थं व्यवस्थितं कुर्वन्ति । विधिसूत्रेषु समुपस्थिताः अनियमितताः दूरीकर्तुं पूर्णं दायित्वं परिभाषाणामेव अस्ति यथा तस्मिन्निति निर्दिष्टे पूर्वस्य परिभाषासूत्रम् इको यणचि इति विधिसूत्रे सप्तमीं पश्यदेव प्रवृत्तं भवति तथा अव्यवहितपूर्वम् इति उपस्थाय इको यणचि इति विधिसूत्रस्य अर्थं तथा करोति येन सोऽर्थः अतिव्याप्तः वा अव्याप्तः न भवति । तथैव इको गुणवृद्धी इति परिभाषाकारणतः सार्वधातुकार्धधातुकयोः इति विधिसूत्रस्य गुणस्य स्थानी इक् एव भवति न तु अन्यः । इयं परिभाषा स्वलक्ष्यभूत-विधिस्थले इकः उपस्थित्या सार्वधातुकार्धधातुकयोः इति विधिसूत्रं व्यवस्थितं करोति । उक्तयोः उदाहरणयोः परिभाषासूत्रस्य नियमकारित्वं निर्दिष्टं भवति ।

महाभाष्यकारेण पतञ्जलिना एकत्र अधिकारपदेन परिभाषापि परिगणिता । "अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वशास्त्र-मभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्ववेश्माभिज्वलयति । अपरोऽधिकारः यथा रज्ज्वा अयसा वा वद्ध्वा काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण । अपरोऽधिकारः प्रतियोगं तस्य निर्देशार्थ इति योगे योगे उपतिष्ठते ।" (महाभाष्य 1.1.49)

अत्र प्रथमः अधिकारः परिभाषारूपः अस्ति यः एकदेशस्थः सर्वशास्त्रं प्रकाशयति यथा सुप्रज्वलितः प्रदीपः सम्पूर्णगृहं प्रकाशयति तद्वत् परिभाषापि एकत्र स्थिता सती समस्तशास्त्रं (विधिसूत्राणि) प्रकाशयति । अत्र ध्यातव्यं यत् भाष्यकारेण कश्चित् इति पदप्रयोगः परिभाषानिमित्तमेव कृतः कश्चिदिति- परिभाषाख्य इत्यर्थः (प्रदीपः 1.1.49)।

अष्टाध्याय्याः अनुशीलनेन इदं ज्ञायते यत् परिभाषाधिकारयोः पार्थक्यमस्ति । परिभाषा अधिकारश्च पृथक् सूत्रभेदः अस्ति ययोः आपाततः प्रतीयमानं सादृश्यं तयोः अभिन्नत्वं प्रमाणयितुं न शक्नोति । परिभाषापदेन अत्र वाचनिकज्ञापकन्यायसिद्धेति त्रिविधपरिभाषाणां ग्रहणम् अभीष्टं नास्ति-"परिभाषा हि न पाणिनीयानि वचनानि" (पुरुषोत्तमदेवकृत परिभाषा 119) अत्र परिभाषातात्पर्यं नाम पाणिनिप्रणीतपरिभाषासूत्राणि एव ।

वस्तुतः संज्ञादिपञ्चविधसूत्राणि विधिसूत्रसहायकत्वात् परार्थकानि इति वक्तुं शक्यते किन्तु परार्थकतायां सत्यामपि स्वदेशे तेषाम् अर्थबोधकतारूपप्रयोजनं दृश्यते । अधिकारसूत्राणां स्वदेशे किमपि प्रयोजनं नैव लक्ष्यते अतः अधिकारसूत्रस्य पारार्थ्ये अन्यसूत्राणाञ्च पारार्थ्येऽपि लक्ष्यमाणभेदः अस्ति । महाभाष्यकारेण परिभाषामेकदेशस्थामुक्त्वा अधिकार-परिभाषयोः भेदः सम्यक् सङ्केतितः ।

स्वविधिसूत्राणाम् अव्यवहितपूर्वं परिभाषासूत्राणाम् अवस्थानम् आवश्यकं नास्ति किन्तु अधिकारसूत्राणि स्वप्रदेशभूतविधिसूत्राणाम् अव्यवहितपूर्वं पठितानि सन्ति येन तेषाम् उत्तरोत्तरगमनम् अबाधितं दृष्टिगोचरं भवेत् । परिभाषायां तथा तत्प्रदेशभूतविधिसूत्राणाम् उक्तक्रमः अभीष्टः न दृश्यते । अतः परिभाषा एकदेशस्था घोषिता प्रदीपेन च उपमिता ।

* * *



# अद्वैतवेदान्तशास्त्रे "अधिकारी"

डॉ० सुकान्तकुमारसेनापतिः

लोके छात्राणां प्रवृत्तिः त्रिधा दृश्यते । अध्येतारः छात्राः तेषां तेषां विषयाणां पठनाय जिज्ञासया, बुद्धिसामर्थ्येन, प्रेरणया, अभिरुच्या च प्रवर्तन्ते । अतः केचन विज्ञानविषयस्य पठनाय, केचन गणितविषयस्य पठनाय, केचन संस्कृतविषयस्य पठनाय, केचन पुनः आँग्लः राजनीति-विषयाणां पठनाय प्रवृत्ताः भवन्ति । मया एषः विषयः ज्ञातव्यः इति इच्छया या प्रवृत्तिः सा भवति जिज्ञासया प्रवृत्तिः, अहम् एनं विषयं पठित्वा तत्र नैपुण्यं सम्पादयितुं शक्नोमि इति दृढनिश्चयेन या प्रवृत्तिः सा भवति बुद्धिसामर्थ्येन प्रवृत्तिः, एतस्य विषयस्य पठनेन एषः लाभ अस्ति इति ज्येष्ठानां शिक्षकाणां च वचनेन परामर्शेण वा प्रेरिताः सन् अहम् अमुं विषयं पठामि इति निश्चित्य या प्रवृत्तिः सा भवति प्रेरणया प्रवृत्तिः, मम एतस्मिन् विषये 'अभिरुचिः' अस्ति अतः अहमेनं विषयं पठामि इति भावनया या प्रवृत्तिः सा भवति अभिरुच्या प्रवृत्तिः । उपर्युक्तैः कारणैः तेषु तेषु विषयेषु प्रवृत्तिमन्तः अधिकारिणः भवितुमर्हन्ति इति सामान्यरूपेण वक्तुं शक्यते ।

अस्माकं शास्त्राध्ययनपरम्परायां कस्य विषयस्य कः अधिकारी भवितुमर्हति इति चिन्तनमपि कृतम् अस्ति । भारतीयदर्शनपरम्परायां प्रथिते अद्वैतवेदान्तदर्शने "अधिकारी" इति विषये विशिष्य चर्चा कृता वर्तते । तदत्र वयं यथाक्रमं चिन्तयामः ।

अस्माकं शास्त्राध्ययनक्रमे यस्य कस्यापि शास्त्रस्य पठनात् पूर्वं चतुर्णां सोपानानामनुसरणम् अवश्यं करणीयं भवति । तानि चत्वारि सोपानानि एवं सन्ति -

* अधिकारी
* विषयः
* सम्बन्धः
* प्रयोजनम् इति ।

एतेषां समवायः शास्त्रे अनुबन्धचतुष्टय इति उच्यते । अनुबन्ध-चतुष्टयस्य आवश्यकतां प्रतिपादयन्ति शास्त्रकाराः । तद्यथा-

ज्ञातार्थं ज्ञातसम्बन्धं
श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः
सम्बन्धः सप्रयोजनः ।।[1]

किं च, या काऽपि विद्या यस्मै कस्मै दातुं न शक्यते । तस्याः विद्यायाः दानात् पूर्वं पात्रतापरीक्षणमावश्यकम् इति कृत्वा शास्त्रकाराः एनम् अधिकारिविचारं कृतवन्तः इति चिन्तयितुं शक्यते । "अर्थंकन्या तथा विद्या अनर्थिभ्यो न दीयते" इत्यभ्युक्तिमनुसृत्य अधिकारिचिन्तनम् अवश्यं कर्त्तव्यम् इति प्रतिभाति । अपि च अन्ततः अधिकारी भवति फल भोक्ता । अतः अपि शिष्ये पात्रतां परीक्ष्य गुरुणा सा विद्या तस्मै तस्मै अधिकारिणे प्रदेया भवेत् इति कारणतः अपि शास्त्रे अधिकारिचिन्तनम् अपेक्षितम् इति भावयितुं शक्नुमः ।

तत् तत् कर्मणि यः समर्थः भवति सः फलस्य भोक्ता भवितुमर्हति न तु असमर्थः कश्चित् । अतः अधिकारी समर्थः स्यात् । एतस्मिन् सन्दर्भे आचार्यशङ्करेणोक्तं पद्यम् इदं स्मरामः –

अधिकारिणमाशास्ते
फलसिद्धिर्विशेषतः ।
उपायाः देशकालाद्याः
सन्त्यस्यां सहकारिणः ।।[2]

वेदान्तशास्त्रे - (ऋग्-यजुः-साम-अथर्वेति चतुर्णां वेदानां शिक्षा-कल्प-व्याकरण-छन्द-निरूक्त-ज्योतिषाम् इति एतेषां षण्णां वेदाङ्गानां च अध्येता, आपाततो वेदवेदाङ्गानाम् अर्थज्ञाताः, नित्य-नैमित्तिक-प्रायश्चित्त-



उपासनादीनां कर्मणां त्यागकर्ता, नित्यानित्यादिसाधनचतुष्टयसम्पन्नः "शान्तः दान्तः" प्रमाता अधिकारी इत्युक्तम्[3])

तात्पर्यतः वेद-वेदाङ्गानामर्थज्ञानस्य अभावेऽपि सामान्यतो एतेषामर्थज्ञाता एतस्मिन् जन्मनि पूर्वस्मिन् जन्मनि वा नित्यनैमित्तिककाम्य-निषिद्धोपासनादिकर्मणां वर्जयिता निरस्तसमस्तपापपङ्ककलङ्कः अमलीकृतमनः शमदमादिसाधनचतुष्टयादिगुणविभूषितः वेदान्तविद्यायाम् अधिकारी भवितुमर्हति इति । पुनश्च अधिकारी नित्यानित्यवस्तुविवेकवान् स्यात्, एतस्य लोकस्य स्वर्गलोकस्य च सुखानां विषये नितरां विरक्तः स्यात् उक्तं च आचार्येण -

आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलाभोगविरागस्तदनन्तरम् ।।[4]

शमदमोपरतितितिक्षाश्रद्धा समाधानम् इति एतैः गुणैः युक्तः स्यात् परमे पुरुषार्थे मोक्षे इच्छावान् स्यात् अधिकारी । उक्तं च –

प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे ।।[5]

सम्प्रति साधनचतुष्टयेन विवक्षितानाम् अंशानां विषये किञ्चित् चिन्तयामः । तत्र प्रथमः नित्यानित्यवस्तुविवेक इति नित्यानित्यवस्तु विवेको नाम इदं नित्यं तत् अनित्यम् इति भेदज्ञानम् अर्थात् 'ब्रह्म' एव नित्यम्, तद्भिन्नं निखिलमपि वस्तुजातम् अनित्यम् इति निश्चयः । एतस्मिन् सन्दर्भे एवमुक्तमाचार्यशङ्करेण -

ब्रह्मसत्यं जगन्मिथ्येवं रूपो विनिश्चयः ।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ।।[6]

इहामुत्रार्थफलाभोगविरागः इति द्वितीयं साधनम् । इह नाम एतस्मिन् लोके, अमुत्रं नाम स्वर्गलोके इति अर्थः । एतस्मिन् लोके विद्यमानानां भौतिकसुखानाम्, स्वर्गलोके विद्यमानानां पारलौकिकसुखानां च विषये सुतरां विरक्तिः त्यागभावना भवति इहामुत्रार्थफलभोगविरागः । एतदेवतत्त्वं वैराग्यशब्देन कथयति आचार्यशङ्करः –

तद्वैराग्यं जुगुप्सा या दर्शनश्रवणादिभिः ।
देहादिब्रह्मपर्यन्ते ह्यमित्येभोगवस्तुनि ।।[7]

साधनचतुष्ट्यक्रमे शम-दम-उपरति-तितिक्षा-श्रद्धा-समाधानाख्याः तृतीयसाधनत्वेन उक्ताः सन्ति । एतेषां षण्णां समूहः एव "षट्क्सम्पत्तिः" इति उच्यते । **अन्तरिन्द्रयपरिग्रहः शमः, बहिरिन्द्रियनिग्रहो दमः, विक्षेपाभावः उपरतिः, शीतोष्णादिद्वन्द्वसहनं तितिक्षा, चित्तैकाग्र्यं समाधानम्, गुरुवेदान्तवाक्ये विश्वासः श्रद्धा** इति एतानि षट्क्सम्पत्तिविषये भवन्ति शास्त्रीयवचनानि ।

षटक्सम्पत्तिक्रमे उक्तानां षण्णाम् अधिकारिगुणानां स्वरूपविषये किञ्चिदिह चिन्तयामः । तत्र शमः नाम अन्तरिन्द्रियस्य मनसः स्ववशे स्थापनम् । तदेवमुच्यते शास्त्रेषु -

विरज्य विषयव्रातात् दोषदृष्ट्या मुहुर्मुहुः ।
स्वलक्ष्ये नियतावस्था मनसश्शम उच्यते ।।[9]

दमः नाम बहिरिन्द्रियाणां श्रोत्रादीनां ज्ञानकरणानां, वागादीनां कर्मकरणानां च स्व स्व स्थाने स्थापनम् इति । एतदेवं वर्णितम् आचार्य-शङ्करेण -

विषयेभ्य परावर्त्य स्थापनं स्व स्व गोलके ।
उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ।।[10]

उपरतिः नाम सहजतया तत् तत् विषयान् प्रति प्रवृत्तानाम् इन्द्रियाणां तेभ्य विषयेभ्य अपाकृष्य पुनः स्ववशे स्थापनम् इति । एतस्मिन् उपरति शब्दविषये कश्चन आक्षेपः एवम् अस्ति यत् उपरतिः इति यः गुणः षट्क्सम्पत्तिक्रमे उक्तः सः संन्यासिनामेव सम्भवति न तु अन्येषाम् इति । एतस्य आक्षेपस्य समाधानम् अपि एवम् उक्तम् यत् 'उपरम' इति शब्दस्य संन्यासी इति न अर्थः किन्तु विक्षेपाभाव इति अर्थ अत्र इष्टः । उपरम = विक्षेपाभाव इति अर्थस्य स्वीकरणेन उपरति गृहस्थानाम् अपि भवितुमर्हति, यथा वा जनकादीनां गृहस्थानां ब्रह्मविचारप्रसङ्गः अभवत् इति । उपरति स्वरूपमेवं वर्णयति आचार्यशङ्करः -

**बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा ।।**[11]

शीतोष्णादिद्वन्द्वसहनं भवति तितिक्षा । सुखदुःखयोः सहने समर्थः पुरुषः तितिक्षु इत्युच्यते । तदेवमुक्तम् आचार्यशङ्करेण -



"सहनं सर्वदुःखानाम् अप्रतीकारपूर्वकम् ।
चिन्ताविलापरहितं सा तितिक्षा निगद्यते ।।[12]

श्रद्धा नाम गुरुणा उक्तेषु वचनेषु, शास्त्रोक्तवचनेषु उपनिषद्वाक्येषु, आप्तोक्तेषु वाक्येषु च आस्ता सत्यमिदं वचनं, वाक्यम् इति दृढ-सत्यमिदं भावना । यः श्रद्धावान् स एव विद्यायाम् अधिकारी भवितुमर्हति । श्रद्धारहिताः जनाः पुनः पुनः दुःखमेव प्राप्नुवन्ति । अत एव उक्तं गीताचार्येण -

अश्रद्धधाना पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ।।[13]
"शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यावधारणा ।
सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते ।।[14]

समाधानं नाम गुरोर्वाक्यात्, शास्त्रवचनात्, उपनिषद्वचनात् च निगृहीतस्य तत्तस्य मननपूर्वकं सम्यक् धारणम् अर्थात् बुद्धौ "ब्रह्मैव सत्यम्" इति निश्चयीकरणं समाधानम् इति । तदुक्तम् आचार्यशङ्करेण-

सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।
तत्समाधानमित्युक्तं न तु चित्रस्य लालनम् ।।[15]

एतादृश-षट्क्सम्पत्तिसम्पन्नस्य, नित्यानित्यवस्तुविवेकवतः, इहामुत्रा-र्थफलभोगविरागवतः, साधनगणविमण्डितस्य पुरुषस्य स्वत एव सम्भवति मोक्षे इच्छा, एषैव भवति मुमुक्षुता । एतद्विषये एवमुक्तम् आचार्य शङ्करेण-

अहङ्कारादिदेहान्तान् बन्धानज्ञानकथितान् ।
स्व स्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ।।[16]

एवं साधनचतुष्टयविभूषितः शान्तोदान्त उपरतितितिक्षु च भवति वेदान्तशास्त्रे प्रमाता, ज्ञाता, अधिकारी इति शम् ।

सन्दर्भसंकेताः

1. वेदान्तसारः पृ. - 12
2. विवेकचूडामणिः - पद्यसंख्या - 14
3. वे. सा. - पृ. 12
4. वि. चू. प. सं. - 19
5. वे. सा. प. - 12
6. वि. चू. प. सं. - 20
7. वि. चू. प. सं. - 21
8. वेदान्तपरिभाषा परि. 8 पृ. - 374
9. वि. चू. प. सं. - 22
10. वि. चू. प. सं. - 23
11. वि. चू. प. सं. - 24
12. वि. चू. प. सं. - 25
13. भगवद्गीता - अ. 9-3
14. वि. चू. प. सं. - 26
15. वि. चू. प. सं. - 27
16. वि. चू. प. सं. - 28

* * *



# वाल्मीकिरामायणे प्राशासनिकसमीक्षा

आचार्य व्रजकिशोरस्वाईं

पितुर्दशरथस्य सत्यवचनं पालयितुं रामचन्द्रश्चतुर्दशवर्षाणि वनवासमकरोत्। एतस्मिन्समये वसिष्ठप्रभृतयो राजकर्तारो भरतं मातुलगृहादानीय राजानं चक्रिरे तस्मिंश्च अयोध्यायाः शासनभारमारोपयामासुः। यदि वा भरतस्तं भारं वोढुमनिच्छुक आसीत् तथापि अनन्योपायो भूत्वा तं भारमग्रहीत् । किन्तु श्रीरामचन्द्रमविज्ञाप्य अयोध्यायाः शासनं कर्तुं सोऽनुचितममन्यत । अतः श्रीरामचन्द्रं वनात्प्रत्यावर्तयितुं यदा स वनमगच्छत् तदा रामचन्द्रो भरतादयोध्यायाः प्राशासनिकं समाचारं ज्ञातुमैच्छत् । एतस्मिन् समये रामचन्द्रो भरतस्य प्राशासनिकं कार्यजातं समीक्षितवान् । समीक्षायां सोऽपृच्छत् यत् यः शासकः यां काञ्चित् शैलीमवलम्ब्य शासनं करोतु नाम सोऽवश्यं चतुर्दश दोषानाचरेत् यस्ततो निवृत्तो भूत्वा सम्यक् शास्ति तं प्रति शास्यवर्गोऽनुकूलमतं पोषयित्वा वर्तते । अस्मिन् सन्दर्भे भरतकर्तृकप्राशासनिककार्यजातस्य रामचन्द्रकर्त्तृकसमीक्षायां तान् चतुर्दश दोषान् निरीक्षितुं प्रयासो विधीयते (वा. रा. 2.100.65.-67)।

प्रशासनकर्मणि ये चतुर्दश राजदोषा लक्षीक्रियन्ते तेषु "कर्मणः परिणामं प्रति असचेतनता" अन्यतमा । इमं दोषं वाल्मीकिः नास्तिक्यपदेन अभिदधाति । शासकेन यः पदक्षेपो गृह्यते तस्य परिणामः कः ? तस्य च जनतासु शासने च कीदृशः प्रभाव इत्यस्मिन् विषये शासकीयपदक्षेपात्पूर्वं चेत् आकलनं न क्रियेत तर्हि शासकोऽपरिणामदर्शी भवेत् । श्रीरामचन्द्रस्य शासनसमये शासको वंशपरम्परानुसारं नियुक्तो भूत्वा शासनमकरोत् । शासकस्य राजदोषो जनानामुपरि कीदृशं प्रभावं पातयति इति विषये सोऽत्यधिकं चिन्तयति स्म । यदि जनानां मनसि राज्ञोऽपरिणामदर्शितारूपो दोषस्तिष्ठेत् तर्हि इतिहासे शासनस्य कलङ्करूपेण अयं चिररात्राय तिष्ठेत्।

तस्मिन् समये इतिहासात् राज्ञोऽतीवभीतिरासीत् । संप्रति शासका: वारंवारं परिवर्तन्ते । कस्मिन् शासने क: शासक: कं दोषं करोति तं मनसि स्थापयितुं जना न पारयन्ति । अतो ये शासनारूढा भवन्ति ते जनतानां हिताय अधिकं न चिन्तयित्वा आत्मनो लाभक्षती विचारयन्ति । एतत्तु सत्यं यत् समष्टिगतशासनेन क्रियमाणाद्दोषाद्धेतो: कश्चन एकोऽपराधेन धर्तव्यो न भवति । समष्टिद्वारा यो दोष: स दोषत्वेन यदि वा निर्धारयितुं शक्यते तथापि तस्य दोषस्य आचरणकर्त्ता धर्तुं न शक्यते । रामचन्द्र एतादृशस्य दोषस्य परिणामं परजन्मपर्यन्तमाकृष्य अग्रहीत् । संप्रति अस्य राजदोषस्य परिणाम: पञ्चवर्षपर्यन्तमपि नेतुं न शक्यते ।

प्रशासनकर्मणि द्वितीयो राजदोषो "ऽमूलकनिष्पत्ति:।" वाल्मीकिना अयं दोषोऽनृतमिति उच्यत । कस्यचन कार्यस्य संपादनात्पूर्वं यदा निर्णय: क्रियते तत: पूर्वं तस्य मूलं किमिति विषये यदि राजा अवहितो न तिष्ठेत् तर्हि परस्मिन् समये तस्य विरोधे आपत्तेरूपस्थितौ स तां कौशलपूर्वकमुपेक्षितुं प्रवर्त्तते । इदानीन्तनकाले "प्राशासनिकी उपेक्षा" इति कथ्यते । तर्हि अयं दोष: किमर्थं भवतीति अस्य किञ्चित् सम्यक् कारणं वर्त्तते । अधस्तना जना यदि कञ्चित् दोषमाचरन्ति तर्हि उपरितना अधिकारिणस्तान् दण्डयन्ति । किन्तु यदि राजा स्वयं ज्ञात्वैव दोषानाचरेत् कस्तं निवारयेत् निवर्तयेद्वा ? अत: स दोषान् कृत्वा तान् रहसि रक्षितुं चेष्टते अथवा तान् सत्यापयितुं प्रवर्तते । शासक: सर्वथा पूर्वनिर्णयमाधृत्य शासनं कुर्यात्, निर्णयात् अपसृत्य तं न परिवर्तयेत् । किन्तु निर्णये यदि कश्चन दोषस्तिष्ठेत् तं दोषं सत्यापयितुं शासकश्चेष्टेत । किन्तु एतादृशी स्थितिर्यथा नोद्भवेत् इत्यस्मिन् विषये सचेतनताऽवलम्बनाय रामचन्द्रो भरतं तत्कार्यसमीक्षाव्यपदेशेन कथयति ।

"क्रोधो" राज्ञस्तृतीयो दोष: । शासनभारग्रहणात्पूर्वं शासको येन अपकृतो भवति स्म शासनभारग्रहणानन्तरं स तं प्रति क्षमाशीलो भवितव्य: । शासनभारग्रहणं भवति अभ्युदय: । अभ्युदये क्षमा प्रदर्शनीया । शासकस्य क्षतिं घटयित्रा जनेन शासनभारग्रहणादनन्तरं शासकात् प्रतिहिंसा आशास्यते' लोकेऽपि तादृशी संभावना विद्यते । यदि शासक: क्रोधान्वितो भूत्वा निजशासनकलस्य अपप्रयोगेण तस्य क्षतिं साधयति तर्हि क्षतिं लभमानो



जन: कदापि तत: त्राणं नैव प्राप्नुयात् इति नावितथम्, किन्तु अस्मात् घटनात् हेतो: सामाजिका: शासकं प्रति घृणाभावं प्रदर्शयेयु: । एतेन सामाजिकानां जनानां शासनोपरि हीना भावना आगच्छति । कालक्रमेण समस्ते राष्ट्रे प्रतिहिंसापरायणता वर्धेत । भरतं प्रति उपदेशव्याजेन रामचन्द्र: कथितवानासीत् यत् सर्वेषु कार्येषु, निरर्थकतया शासको हस्तक्षेपं न कुर्यात् ! एवं स्याच्चेत् सर्वत्र शासकस्य मतं नैव ग्रहणीयं भवेत् । क्षमताया: अहमिकायाश्च हेतो: अत्र शासकस्य क्रोधो जायते । एतत्तु, सत्यं यत् शासकस्य क्रोधं सोढुं न कोऽपि पारयेत् । इत्थं च निम्नवर्गस्य जनोऽपि शासकस्य विरोधे आत्मन: प्रतिक्रियां प्रकाशयितुं चेष्टेत । एतस्य फलेन कश्चन निरीहोऽपि जन: स्वबुद्ध्या शक्त्या च शासकस्य विरोधे आत्मनोऽसन्तोषं प्रतिक्रियारूपेण व्यञ्जयेत् ।

राज्ञ: चतुर्थो दोषो भवति "प्रमाद:" । शासक: स्वकर्तव्यदृष्ट्या यत् स्वत: कुर्यात् स चेत् तत् न कुर्यात् तत् तस्य प्रमादरूपं धत्ते । राजतन्त्रशासने प्रजानां जीवनं, धनं, संपदं च रक्षितुं राजा स्वपक्षत: स्वत: कर्तव्यमनुष्ठापयेत् । अन्यस्य राष्ट्रस्य प्रभावात् आक्रमणाद् वा, आभ्यन्तरीण-तस्करात् प्रजानां धनजीवनरक्षायां यदि राजा अवहेलनां कुर्यात् तर्हि इदं घोरतरप्रमादरूपेण अवतरति । गणतन्त्रशासने जनमङ्गलकार्यसंपादनार्थं शासकोऽधिकतरमवसरं प्राप्नोति । तत्र चेत् सोऽवहेलां प्रदर्शयेत्, एवं च तदवहेलाप्रदर्शनं गतानुगतिकं भवेत् तर्हि एतत् शासकस्य एको दोषो भवति । शासनपक्षत: लोकानां मङ्गलाचरणे यथा अवहेलाप्रदर्शनं नैव स्यादित्यर्थं शासको नितरां यतेत । अत्र शासको यदि यतमानो न भवेत् तर्हि शासकस्य अवहेलना क्रमशो जनानां कर्तव्यच्युतिमुत्प्रेरयेत् । तादृशी अवहेलना यथा शासने न स्यात् तदर्थं रामचन्द्रो भरतमुपदिशति स्म ।

राज्ञ: पञ्चमो दोषो "विलम्बित: पदक्षेप:"। वाल्मीकि: इमं दोषं "दीर्घसूत्रिता" इति पदेन अभिदधाति । यस्मिन् समये यत्कर्म कर्तव्यं तस्मिन् समये यदि तत् कर्म न क्रियते तर्हि तेन दीर्घसूत्रिता प्रकाश्यते । क्रमेण इयं विलम्बितपदक्षेपरूपकमेकं दोषमुद्भावयति । अनेन च श्रम:, अर्थ:, समय: कौशलं, जनशक्तिश्चेति सर्वं विनियुक्तं भवति, किन्तु सर्वं वृथा भवति, न किमपि फलप्रदं भवति । यत्र या क्षति: घटते सा पूरयितुं

न शक्यते । यत्र यत् लब्धव्यं वर्तते तत्र तत् नैव लभ्यते । कृषिकर्मणि अधिकतया तत्परतायाः प्रकाशः आवश्यकः । वाणिज्यं धीरतया प्रचलेत् । किन्तु कदापि वाणिज्ये त्वरा न प्रकाश्येत । जलसञ्चारं भूमेः स्वास्थं च वीक्ष्य यदि कर्मारम्भो नैव क्रियेत तर्हि कृषित आशाजनकं फलं नैव प्राप्येत । तथैव च वाणिज्यात् फलं नैव लभ्येत । क्रयविक्रयौ ग्राहकाधीनौ । विक्रेता पण्यं विक्रेतुं यदि त्वरां प्रकाशयेत् तर्हि वाणिज्यं सम्यग् न भवेत् । कृषिकर्मणि विलम्बितः पदक्षेपः कृषेः फलं व्याहन्ति । भारतवर्षमेकः कृषिप्रधानो देशः । अत्र शासकः कृषिकर्मणि अधिकतया गुरूत्वमादध्यात् । कर्षकाणां कृषिकर्मणि शासकेन यथा साहाय्यं प्रदर्श्येत तथा यदि न क्रियेत एवं वा विलम्बेन क्रियेत तर्हि तत्कृषिकर्म फलदायकं न भवेत् । राज्ञोऽयमेको दोषः । एतस्मात् दोषात् राष्ट्रिय आयो व्याहतो भवेत् । रामचन्द्रो भरतं प्रति तत्कार्यसमीक्षाप्रसङ्गे समुचितसमये समुचितपदक्षेपार्थं परामर्शं ददाति ।

राज्ञः षष्ठो दोषो भवति "अभिज्ञानां परामर्शस्य उपेक्षा"। यस्मिन् क्षेत्रे योऽभिज्ञः तस्मिन् क्षेत्रे स यं परामर्शं कथयति शासकेन स परामर्शः झटिति कदापि न ग्रहीतुं शक्येत, किन्तु श्रोतव्य एव । न केवलं राष्ट्रियक्षेत्रेऽस्य उपयोगिता अस्ति, अपितु प्रशासनकर्मसु अस्य यथार्थता सर्वाधिका । अभिज्ञाजनास्तद्विदो भवन्ति । परामर्शव्याजेन यत्ते ब्रुवन्ति तत् पुङ्खानुपुङ्खं हृदयीकृत्य राज्ञा कार्यक्रमो निर्धारणीयः । तेषां परामर्शस्य उपेक्षया युगपद् दोषद्वयं भवेत् । प्रथमतः तेषां परामर्शममानयित्वा शासको विपथगामी भवेत्, द्वितीयतः ये विवेकिनः बुद्धिमन्तः, सज्जना, भद्रा अभिज्ञाश्च तेषां शासनविषये दुर्भावना सृज्यते । एतत्तु सत्यं यत् भद्राणां समाजस्योपरि विद्यमानः प्रभावः सर्वाधिकः । न केवलं तथा, अपितु तेषां प्रभावोऽत्यन्तं गभीरतरः । यदि राज्ञ उपरि वा शासकस्य उपरि तेषां भावना दूषिता भवेत् तर्हि तेषां प्रभावात् समस्तस्य समाजस्य भावना राज्ञो विषये दूषिता भवेत् । पूर्वस्मिन् काले इयं दुर्भावना अपनिन्दारूपेण परिणमति स्म । अपनिन्दाहेतोः कदाचित् राजा शासनक्षमतां नाशयेत् । अतोऽभिज्ञानामुपेक्षया यावती बाह्या क्षतिः तावति च आभ्यन्तरीणा क्षतिर्भवति । अभिज्ञानां परामर्शोपरि गुरूत्वं समारोप्य तेषां परामर्शश्रवणाय रामचन्द्रो भरतमुपदिदेश ।



राज्ञः सप्तमो दोषः "आलस्यम्" । पूर्वस्मिन् काले एतदालस्यं शारीरिकालस्यत्वेन परिगण्यते स्म । स्वयं शासकः शासनकर्मणि यथा एका कुशलिव्यक्तिस्तथैव च राष्ट्रस्य प्रतिरक्षाकार्यनिर्वाहे एकः पराक्रमशाली योद्धा । पराक्रमः सर्वथा मनुष्यस्य स्फूर्तिं जनयति । किन्तु पराक्रमस्य समुचितः सफल उपयोगो यदि न भवेत् तर्हि आलस्यं जायेत । यदा जनमतेन शासको निर्णीयते तदा शासकस्य एकं भिन्नप्रकारकमालस्यं जायते, चिन्तने कार्यकलापे च यदि आलस्यं प्रदर्श्यते तर्हि तदालस्यं शासकस्य स्थायित्वे बाधां जनयति, राष्ट्रस्य प्रगतौ स्थाणुतामानयति । अन्यथा राष्ट्रस्य नानाविभागीय कार्यकलापेषु शासकीयालस्यस्य प्रभावः पतति । जनाः स्वस्वविभागीयकार्यजातं संपादयितुमाग्रहं नैव प्रकाशयेयुः । एतत्तु सर्वथा मनसि कर्त्तव्यं यत् नित्यतया निरन्तरतया निरलसतया च कर्मकुर्वतां जनानां मनसि कर्मकरणे यदि सकृदनाग्रह आगच्छेत्, तर्हि तमनाग्रहं दूरयितुं सौख्येन न शक्येत । राज्ञ आलस्यपरायणताहेतोः अमात्येभ्य आरभ्य सर्वनिम्नवेतनभोगिकर्मचारिपर्यन्तं सर्वेषां जनानां कार्येषु अनाग्रह आगच्छेत् । द्रुतचिन्तनेन तीक्ष्णबुद्ध्या स्फूर्त्या च कर्म कुर्वतो जनस्य यथार्थतया आवश्यकताज्ञानं तिष्ठति । एतादृशस्य जनस्य मनसि आलस्यं न तिष्ठति । भरतस्य कार्यसमीक्षासमये रामचन्द्र एतत्सूचयितुमिच्छति स्म यत् उद्दामतया कार्यसंपादनं प्रशासकस्य एकत्रे दक्षताद्योतको गुणः ।

राज्ञोऽष्टमो दोषो "विलासपरायणता" । नानासमयेषु समाजस्य नानावर्गीया जनाः शासनसंबद्धा भवेयुः । वंशानुक्रमिकशासने शासनकर्ता झटिति विलासपरायणताया वशवर्त्ती भवति । विलासपरायणता न केवलमेको लौकिको व्यापारः, मनुष्यस्य यावत्प्रकारका योगाः सन्ति ते सर्वे विलासस्य साधनानि भवन्ति । वंशानुक्रमिककर्मवारिणोऽत्र विलासमधिकारबुद्ध्या पश्यन्ति । संप्रति लोकप्रतिनिधिभित्तिकशासने समाजस्य नानावर्गीया जनाः शासनसंश्लिष्टा भवन्ति । स्वजीवनावधौ विलाससामग्रीं ये न प्राप्नुवन्ति ते यदि शासनसंबद्धा भवन्ति ते तर्हि विलासं विधिसिद्धं कारयन्ति । शासनसंबद्धा जनाः अधिकतया यदि इन्द्रियभोगवशवर्त्तिनो भवन्ति तर्हि ते जनतानां विधिसिद्धविलाससामग्रीमात्मसात्कुर्वन्ति कर्तुं च प्रवर्त्तन्ते कौटिल्य एतं विषयं सूचयितुं कथयति यत् धर्मस्य मूलमर्थः । अर्थस्य मूलमिन्द्रियजयः ।

यत्र शासकः स्वभोगलालसामत्यन्तं संयमावलम्बनपूर्वकं चरितार्थयन्ति तस्य शासकस्य शासनं समीचीनं तिष्ठति । भरतस्य कार्यकलापसमीक्षाकाले रामचन्द्रः सूचयति यत् ज्ञानेन्द्रियाणामपेक्षया कर्मेन्द्रियाणि यदि अधिकतया सक्रियाणि भवन्ति तर्हि तेषां कवलात् उद्धारार्थं मनुष्यस्य कृते उपायो नास्ति । अमुं दोषं वाल्मीकिः पञ्चवृत्तितां कथयति ।

राज्ञो नवमो दोष "एकचिन्तुकता" । राजतन्त्रशासने राजा शासनस्य सर्वाधिकारी भवति स्म । तथापि स सर्वैः सह परामर्शं कृत्वा स्वकार्यजातं संपादयति स्म । यदा राजा कस्यापि परामर्शमकृत्वा स्वयमेकाकी सर्वस्मिन् विषये चिन्तयित्वा निर्णयं करोति तदा यावत्पर्यन्तं किमपि असौकर्यं न जायते तावत्पर्यन्तं केऽपि किमपि न ब्रुवन्ति, यदा किमपि असौकर्यं जायते तर्हि सर्वे तमाक्षिपन्ति ।

सांप्रतं गणतन्त्रे एतादृशी अवस्था । गणतन्त्रे सर्वैः सह मिलित्वा शासनं चालयितव्यम् । यत्र यत्र ये येऽधिकारिणः स्वयं निर्णयार्थमधिकारं प्राप्नुवन्ति, ते यदि प्रयोजनस्थले सर्वेषां परामर्शं न श्रुत्वा कार्यं कुर्वन्ति तर्हि ते शासनस्य एकस्मिन् पार्श्वे पतन्ति, सर्वेषां सहयोगं च नाशयन्ति । तेषां समुचितो निर्देशोऽपि उत्तमोद्देश्येन कार्यान्वितो न भवति । मन्दोद्देश्येन तु कृतस्य कर्मणो हेतोः ते स्वतो धर्तव्या भवन्ति । सुतरां शासकः सर्वस्मिन् समये यदि कस्मिंश्चित् विषये चिन्तयेत्, किंवा निजचिन्तित-विषयस्य कार्यान्वयनार्थं व्यग्रतां प्रकाशयति स सहयोगिजनान् नैव प्राप्नुयात् । अतः शासकः सहयोगिनां सहकर्मिणां च चिन्तनं सम्मानयेत् । अनेकेषु समयेषु व्यक्तिविशेषाणां वैयक्तिकं चिन्तनं नाना उत्सतः सङ्गृह्य तस्य विश्लेषणं विधाय च कार्यक्रमनिर्धारणं शासकस्य एकः सुमहान् पदक्षेपः अयोध्यायाः शासनविषयं समीक्ष्य रामचन्द्रो भरतमुपदिशति यत् सर्वथा एकेन केनचित् जनेन कस्मिंश्चिद् विषये निर्णयो न कर्तव्यः ।

राज्ञो दशमो दोषो भवति "अनर्थज्ञैः सह मन्त्रणम्"। ये जनाः प्रत्येकं कर्मणि समस्यां सृजन्ति तैः सह परामर्शसंपादनं राज्ञो दोषेषु अन्यतमः । समाजे समस्यासृष्टये ये कारणं भवन्ति तान् उपेक्ष्य समाजस्य परिचालना नैव संभाव्यते । यतः ते समाजस्य आभ्यन्तरीणा जनाः । समाजाभ्यन्तरे केषाञ्चन कर्मणां संपादनार्थं तेषु कश्चन भारोऽर्पयितव्यः, एतेन ते तस्मिन्



कर्मणि यदि लिप्ता भवेयु तर्हि समस्यां स्रष्टुमवकाशं नैव प्राप्नुयुः। अनया दृष्ट्या प्रशासकेन एतादृशा जना नैव उपेक्षितव्याः। शासकस्तेषां परामर्शमवश्यं शृणुयात् विशेषज्ञानां च परामर्शं शृणुयात् । उभयेषां परामर्शं मुक्ताङ्गणे विश्लेष्य उत्तमं परामर्शं गृह्णीयात् । नानासमयेषु अनेकेषां परामर्शोऽवाप्यते । येन परामर्शेन कृतस्य कर्मणः परिणामः सम्यक् न भवेत् तत्परामर्शस्य उपेक्षया या समस्या उद्भवेत् तत्समाधानाय सचेतनो भूत्वा शासकस्तं परामर्शमुपेक्षेत । एतदर्थं राजनैतिकं कौशलमवश्यंभावि । समाजे एतादृशानामुपेक्षणीयानां जनानां सङ्ख्या सर्वस्मिन् समये अधिका । एतेषां परामर्शस्य किञ्चिदाभ्यन्तरीणमुद्देश्यमस्ति । तदुद्देश्यं लक्षीकृत्य ते परामर्शमुपस्थापयन्ति । परामर्शप्रदानसमये स परामर्शः सम्यगिव प्रतिभायात्, किन्तु स भयङ्करं परिणाममुपजनयेत् । एतेन ते परामर्शदातार आत्मनोऽभिलाषं पूरयन्ति । एतादृशानां जनानां परामर्शं प्रति यदि शासको दत्तचित्तो न स्यात् तर्हि स शासक एकं महत्तरं दोषमाचरति । वस्तुत एतादृशा जना अनर्थज्ञा उच्यन्ते ।

राज्ञ एकादशो दोषो भवति "निश्चितानामनारम्भः"। यदा शासकः किञ्चित् कार्यं संपादयितुं काञ्चित् निष्पत्तिं विदधाति, विधाय च कार्यान्वयनं न करोति, तर्हि तदानीमयं दोषो भवति । अस्मिन् स्थले इदमेव वक्तुं शक्यते यत् राज्ञो निष्पत्तिर्द्विधा, तयोरेका नीतिगता इतरा कार्यगता च । अनयोर्मध्ये नीतिगताया निष्पत्तेः झटिति कार्यान्वयनं न संभवति । यतः तस्याः कार्यान्वयनार्थं पूर्वतः क्षेत्रप्रस्तुतिः करणीया, साधनं च निर्णेतव्यम् । एतदर्थं समयोऽपेक्ष्यते । किन्तु कार्यगता निष्पत्ति एतस्या भिन्ना । एतदर्थं पूर्वतः क्षेत्रं प्रस्तुतं तिष्ठति, साधनं च निरूपितं वर्तते । केवलं कार्यान्वयननिष्पत्तिं प्रति प्रतीक्षा क्रियते । अस्या निष्पत्तेः कार्यान्वयनार्थं यदि सिद्धान्तो न क्रियेत तर्हि शासकस्य एको दोषो भवति । अत्र एकः प्रश्न उत्तिष्ठति यत् किमर्थमयमेको भवेदिति । वस्तुतः शासको यत्कार्यं संपादयितुं निष्पत्तिं करोति तत्कार्यस्य संपादनाय संपृक्तो विभागस्तदनुसारेण प्रस्तुतस्तिष्ठति । तस्य कार्यान्वयनेन यत्फलं लभ्येत तत्फलभोगाय जनानां मानसमण्डले प्रस्तुतिर्वर्तते । शासको यदि स्वनिष्पत्त्यनुसारं नैव कार्यं कुर्यात् तर्हि संपृक्तः शासकीयो विभागः स्वप्रस्तुतिं प्रत्याहरेत् । किन्तु

जनाः स्वमानसिकीं प्रस्तुतिं झटिति परिवर्तयितुं न पारयन्ति । अनेन शासकं प्रति ते विमुखभावं प्रकटयन्ति । रामचन्द्रो भरतस्य प्राशासनिक-कार्यजातस्य समीक्षाकाले भरतं प्रति सूचयति यत् निष्पत्तिघोषणानन्तरं यदि कार्यारम्भो न क्रियेत तर्हि तत्कार्यं नाशयितुं प्रवणा जना अवसरं प्राप्नुयुः । निष्पत्त्यनन्तरं झटिति कार्यारम्भेन ते समयं नैव लभेरन् । यत्र शासक एतादृशे कर्मणि अकृतकार्यो भवति तदा अयमेको राजदोषो भवति ।

राज्ञो द्वादशो दोषो भवति "मन्त्रस्य अपरिरक्षणम्" । पदस्य गोपनीयतायाश्च रक्षणं भवति शासकस्य एकमवश्यकर्तव्यम् । पदमर्यादा यदि सुरक्षिता न तिष्ठति तर्हि गोपनीयता न सुरक्षिता भवति । वस्तुतः प्रत्येकसमये शत्रवो विरोधिनो वा पूर्वतो न तिष्ठन्ति । गोपनीयतायाः प्रकाशार्थमावश्यकस्थले विरोधिनः सहयोगिनोऽपि भवन्ति । एतदर्थं पूर्वस्मिन् काले मन्त्रणाकक्षः निरापत्तया परिचालयते स्म । सर्वे तस्मिन् कक्षे प्रवेशाधिकारं नैव प्राप्नुवन्ति स्म । मन्त्रणा विचारणा चेति शासनस्य द्विविधो विभागः । मन्त्रणार्थं यथा गोपनीयता आवश्यकी विचारणार्थं च तथा मुक्तावस्था आवश्यकी । विचारे गोपनीयतायां सत्यां संशयः सृज्येत । मुक्तावस्थायां मन्त्रणापरिचालनेन तस्याः कार्यान्वयनं न सुकरं भवति । गणतन्त्रशासने विवृत्तिमाध्यमेन गोपनीयतायाः परीक्षा क्रियते । शासनीयविवृत्त्या गोपनीयतारक्षायाः परिचयः प्राप्यते । तदर्थं रामचन्द्रो मन्त्रणायाः अपरिरक्षणात्मकं दोषं भरताय असूचयत् ।

राज्ञस्त्रयोदशो दोषो भवति "मङ्गलस्य अप्रयोगः" । यदि शासकः स्वकीये सर्वस्मिन् कर्मणि जनानां मङ्गलं मङ्गलाकाङ्क्षां च परिहरति तर्हि अयं राज्ञ एको दोषः । प्रत्येकं कार्यं यदि मङ्गलबुद्ध्या क्रियते, मङ्गलाकाङ्क्षया च अनुष्ठीयेत तर्हि प्रायेण विपदागच्छति । यदि अमङ्गलबुद्ध्या क्रियेत अथवा अमङ्गलाकाङ्क्षया क्रियेत तर्हि शासकेन स्वयं शत्रून् सृष्ट्वा तैः सह योद्धव्यं भवति । राजतन्त्रापेक्षया गणतन्त्रे इयं स्थितिः समधिका, यतः जनतानां मतेन शासकः शासनपदमधिकरोति । शत्रोर्मित्ररूपेण मित्रस्य च अन्तरङ्गत्वेन परिणमनं शासकस्य लक्ष्यणीयं कर्म । यदि शत्रुः शत्रुदृष्ट्या दृश्येत अथवा तं प्रति शत्रुवत्कार्यं क्रियेत तर्हि स कदापि मित्रं न भवेत् । एतत्तु सत्यं यत् मित्रं कदापि मित्रं न त्यजेत्, किन्तु मित्रं भूत्वैव तिष्ठति ।



किन्तु शासनपदे वर्तमाना जना यदि तेषु अधिकं गुरूत्वमादध्युः तर्हि शासनव्यवस्थायामधिकसङ्ख्यकाः शत्रवोविरोधिनश्च जायेरन् । वस्तुतो ये शत्रवः ते शासनेन तदा प्रभाविता भवन्ति यदा ते विरोधं परित्यज्य शासनं समर्थयितुं पुरोभागमागच्छन्ति । सर्वैः सह समानदूरतां रक्षित्वा शासको यदि कार्यं कुर्यात्तदा शासकस्य कार्यं स्वतः समेषां मङ्गलकरं भवेत्, विरोधिनां मुखबन्धनं भवेत् । एतादृशमङ्गलारोपणकर्मणि ये कुशलिनस्ते उत्तमं शासनं परिचालयन्ति । ये तथा न कुर्वन्ति तेषामयमेको राजदोषो भवति ।

राज्ञश्चतुर्दशो दोषो भवति "प्रत्युत्थानम्" । यदा शासकः शासनं परिचालयति तदा राष्ट्रस्य सर्वस्मिन् मण्डले यदि तस्य विरोधिनः उत्तिष्ठेयुः तर्हि शासनस्य जनस्वीकृतिर्नास्तीति ज्ञायते । अनेकेषु समयेषु यदि जनाः सर्वात्मना शासनं प्रति विरोधभावनया स्वप्रतिक्रियां प्रकटयन्ति तर्हि शासनस्य विरोधे जागरणं सृज्यते । राष्ट्रस्य सर्वासु दिक्षु शत्रूणां प्रत्युत्थानं जायते । आभ्यन्तरीणा प्रतिक्रिया बाह्यशत्रून् राष्ट्रं प्रति आह्वयति । अयं क्रमेण राष्ट्रभङ्गाय कल्पते जनानामसन्तोषः सर्वतः प्रत्युत्थानं सूचयति । रामचन्द्र एतादृशं प्रत्युत्थानं राजदोषत्वेन मनुते ।

एतादृशान् चतुर्दशसङ्ख्यकान् दोषान् प्रति सचेतनामवलम्ब्य शासकः शासनं परिचालयेत् । न केवलं राष्ट्रशासने अपितु यो यत्र शासनमुख्यो भूत्वा प्रशासनभारं च गृहीत्वा वर्तते स एतादृशान् राजदोषान् प्रायेण आचरितुं भूयांसमवकाशं प्राप्नुयात् । भरतस्य प्राशासनिककर्मणि एते दोषाः कदाचित् संभवेयुरिति रामचन्द्रस्तान् समीक्ष्य ततो निवृत्तये भरतमुपदिदेश । अस्य विषयस्य न केवलं रामायणकालीनशासनकर्मणि अपितु सर्वस्मिन् समये प्रासङ्गिकता प्रणिधानयोग्या ।

* * *

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 224193
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः) । अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |
| 18. | पण्डित वृन्दावन त्रिपाठी | 2003 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् ।

❖



# आधुनिकयुगे आयुर्वेदस्य वैशिष्ट्यम्

डॉ० अर्चना कुमारी दूबे

वेदः ज्ञानराशित्वात् शाश्वतस्थायिनः, ज्ञाननिधयः मानवाहितप्रापकाः, मनुज-कर्त्तव्य-बोधका इति ज्ञायते । वेदा आचारसंहितारूपेण प्रमाणीक्रियन्ते 'वेद सर्वज्ञानमयो हि सः' (मनु - २.७) अथर्ववेदस्य उपवेद आयुर्वेदोऽस्ति । आयुर्वेदस्तु विश्वस्य आदिमं चिकित्साविज्ञानमस्ति । आयुर्वेदस्य आयुः वेदः अर्थात् आयुर्ज्ञानम् । अनेन ज्ञायते यत् आयुर्विषयकं ज्ञानमुपजायते तस्य शास्त्रस्य नामायुर्वेदः। शरीर-इन्द्रस्य-सत्त्व-आत्मप्रभृतीनां संयोगस्य नाम हि आयुः । महर्षिणा चरकेण आयुर्वेदस्य परिभाषा इत्थं लिखिता -

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।**
**मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥**

अर्थात् हितम्, अहितम्, सुखम्, दुखम् एतच्चतुर्विधं यदायुः, तस्य हितमहितञ्च, आयुषः प्रमाणं आयुश्च यत्र प्रतिपादितम्' स आयुर्वेदः कथ्यते । आचार्यप्रवरेण भावमिश्रेणापि आयुर्वेदविषये निगदितम् -

**अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च ।**
**तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥**

यतस्तु खलु जनाः आयुर्वेदेनैव अर्थात् आयुर्वेदप्रतिपादित-मार्गानुसरणेनैव आयुः प्राप्नुवन्ति तथा आयुषः ज्ञानं कुर्वन्ति, तस्मादेव कारणात् महर्षिभिः एषः आयुर्वेदः कथितः । अस्य कीदृक् माहात्म्यं महत्त्वं वैशिष्ट्यञ्च, एतद्ज्ञानस्य साम्प्रतं महती आवश्यकता वरीवर्ति । एतद्ज्ञानं विनैव साम्प्रतं जनाः अस्वस्थाः रोगिणश्च भवन्ति । कथितञ्च -

**आयुः कामयमानेन धर्मार्थसुखसाधनम् ।**
**आयुर्वेदोपवेदेषु विधेयः परमादरः ॥**

अर्थात् धर्मार्थसुखसाधनमायुः अभिलषितवता पुरुषेण आयुर्वेदस्य

उपदेशेषु सम्यक्तया आदरः करणीयः। आयुर्वेदस्तु चिकित्साविज्ञानमिति। चिकित्साकार्यमिदं कथमपि न व्यर्थम् तथा चोक्तम्-

**क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः।**
**कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला॥**

अर्थात् ये चिकित्साकार्यमपि कुर्वन्ति, तेषां प्रयासः निष्फलो न भवति। क्वचिदर्थप्राप्तिः, क्वचित् सौहार्दम्, क्वचिद् धर्माचरणम्, क्वचित् कीर्तिश्च भवति। यत्र किमपि न प्राप्यते तत्र कर्माभ्यास एव भवति।

सम्पूर्णे भारतवर्षे चिकित्साशास्त्ररूपेणेत्थमायुर्वेदः प्राचीनकालादेव प्रख्यातो वर्तते। कालक्रमानुसारेण परिज्ञायते यदायुर्वेदस्योपदेष्टा ब्रह्माऽभूत्। पुनः शनैः शनैरायुर्वेदस्य प्रचारम् ऋषयो मर्त्यलोके अकार्षुः। आयुर्वेदस्य प्रथम-प्रचारकरूपे भरद्वाजनामक एव ऋषिरासीत्। न केवलं ऋग्वेदेऽपितु अथर्ववेदेऽपि रोगाणां लक्षणं निदानं चिकित्सा चोपवर्णिता वर्तते। आयुर्वेदेऽस्मिन् -

**आयुर्हिताहितं व्याधिर्निदानं शमनं तथा।**
**विद्यते तत्र विद्वद्भिः आयुर्वेद सः उच्यते॥**

अर्थात् आयुर्हितस्य (पथ्याहारविहारश्च) अहितस्य च (हानिकर-आहार-विहारश्च) रोगस्य निदानानां तथा व्याधीनां चिकित्साऽभिहिता। पुरुषार्थचतुष्टयस्य प्राप्तेर्मुख्यं साधनं शरीरमिति। अतस्तस्य सुरक्षा क्रमेणायुर्वेदः कथयति -

**धर्मार्थकाममोक्षाणां शरीरं साधनं यतः।**
**सर्वकार्येष्वन्तरङ्गं शरीरस्य हि रक्षणम्॥**

सारोऽयं वर्तते यत् धर्म-अर्थ-काम-मोक्षादीनां प्राप्तेर्मुख्यं साधनं शरीरमस्ति। महाकविना कालिदासेनोक्तम् -

**'शरीरमाद्यं खलु धर्मसाधनम्।'**

अतः सम्पूर्णेषु कार्येषु विशेषरूपेण शरीरस्य रक्षा सदा विधेया। आयुर्वेदस्याष्टौ अङ्गानि वर्णितानि सन्ति। तानि चाङ्गानि -

१. शल्यचिकित्सा (Major surgery)
२. शाल्याक्यतन्त्रम् (Minor Surgery)
३. कायचिकित्सा (Healing of disease)
४. भूतविद्या (Demonology)



५. कौमारभृत्यम् (Children disease)
६. अगदन्त्रम् (Toxcology)
७. रसायनतन्त्रम् (Elixive)
८. वाजीकरणतन्त्रम् (Aphrodsias)

**आयुर्वेदस्य आधुनिकयुगे महती आवश्यकता वरीवर्ति -**

१. आयुर्वैदिकभेषजैः विनष्टाः ये ह्यामयाः भवन्ति न तेषां पुनरुत्पत्तिः संभाव्यते
२. सामान्यतः अन्यवैज्ञानिक भेषजानामपेक्षया आयुर्वैदिकभेषज-मल्पमूल्यञ्च भवति।
३. आयुर्वैदिकभेषजैः कोऽपि औषधीनामप्रत्यक्षप्रभावः 'साइडइफेक्ट' न भवति।
४. देशान्तरैः साकं युद्धं यदा भविष्यति तदा विदेशीयभेष-जस्योपलब्धिः एव आदौ न भविष्यति, भवेत् चेत् तदा तद्भेषजं बहुमूल्यं भविष्यति।
५. सामान्यतः आयुर्वैदिकभेषजानां निर्माणं वनस्पतिभिरेव भवति। तथा चेमाः वनस्पतयः सर्वत्रैव सरलतया प्राप्यन्ते। फलतः आयुर्वेदचिकित्सा सुखसाध्या सर्वसाध्या च भवति। गुडूचीं, तुलसीदलं, वासां घृतकुमारी, निम्बवृक्षादिद्रव्यं च सर्वत्र सम्यक्तया सम्प्राप्य चेभिः द्रव्यैः सहायहीना अपि सरलतया स्वचिकित्सां कर्तुमर्हन्ति। किन्तु अर्थहीनाः बहुमूल्यत्वात् विदेशीयैः औषधैः स्वरोगं दूरीकर्तुं न समर्थाः भवन्ति।
६. सन्ति बहवः शारीराः रोगा येषाम् आयुर्वैदिकभेषजैरेव दूरीकरणं सम्भवति। यतस्त्वायुर्वेदे एव तेषां चिकित्सा परिकीर्तिता।
७. रसादिचिकित्सा यादृशी आयुर्वेदे वर्तते, न खलु तादृशी कुत्रापि। रसानामल्पमात्रायामेव प्रदानात् असम्भवमपि सम्भवति। इयं चिकित्सा आयुर्वेदस्य महती सम्पत्तिरस्ति अद्य देशान्तरेऽपि आयुर्वेदीयानां मुक्ताऽभ्रक-मकरध्वजः भेषजानां सम्प्रयोगो भवति।
८. सन्ति बहवो रोगाः येषां विनाशाय आयुर्वेदे बाह्यप्रयोगाः प्रतिपादिताः। अर्थात् सन्ति बहूनि द्रव्याणि येषां बाह्यधारणेनैव

रोगाः विनश्यन्ति । शरीरस्य कायाकल्पोऽनयैव चिकित्सया सम्भवति । आयुर्वेदस्यैव रसायनं वाजीकरणञ्चौषधं वृद्धमपि युवकदशायां परिवर्तयति ।

९. अस्याः चिकित्सायाः मुख्यवैशिष्ट्यमेतत् यत् त्रिदोषसिद्धान्त-माश्रियत्येयं चिकित्सा प्रचलति नूनमियं पूर्णवैज्ञानिकी अस्ति ।

सुश्रुताचार्येणोक्तं यत् –

**विसर्गादानविक्षेपैः सोमसूर्यानिला यथा ।**
**धारयन्ति जगद् देहं कफपितानिलास्तथा ॥**

अत्रायं सारः । आयुर्वेदस्त्रिदोष-सिद्धान्तस्य त्रिपादिकाया उपरि आधारितोऽस्ति ते त्रिदोषास्तु वात-पित्त-कफश्चेति । यदा एते त्रिदोषाः साम्यावस्थायां स्थित्वा शरीरं धारयन्ति तदा ते त्रिधातुनामधेयाः सन्ति । पुनः यदा एते विषमावस्थायां स्थित्वा शरीरे रोगं समुत्पादयन्ति तदा दोषाः कथयन्ति । सर्वेषां रोगाणां मूलकारणं प्रकुपितो दोषो हि वर्तते । यतो ह्युच्यते मलिनीकरणान्मलाः तथा च दूषणात् दोषाः, देहधारणाद् धातव इत्यभिधीयते ।

अतएवायुर्वेदः शरीरस्यास्य मूलोपादानकारणरूपं वातं, पित्तं कफञ्च (त्रिधातु) स्वीकरोति अत्रायुर्वेददृष्ट्या सूक्ष्मविचारणीयं वर्तते यत् भिन्न-चिकित्सापद्धतिवद् आयुर्वेदे केवलं रोग-रहित-शरीरत्वात् कमपि मनुष्यं पूर्णस्वस्थरूपे नैव मन्यते । स्वस्थाः ते मनुष्याः समभिधीयन्ते ये वात-पित्त कफ-त्रिदोषरहिता भवन्ति । यथा चोक्तम् –

**समदोषः समाग्निश्च समधातुमलक्रियः ।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥**

यद्यपि सन्ति संसारेऽन्या नैकाः चिकित्सा-प्रणाल्यः, किन्तु भारतीयानां हिताय यथाऽयुर्वेदस्तथा न कापि चिकित्साप्रणालीति सुनिश्चित-मस्ति । आधुनिकयुगे आयुर्वेदस्य महती आवश्यकता अस्ति । एतद्ज्ञानं विनैव साम्प्रतं जनाः अस्वस्थाः रोगिणश्च भवन्ति ।

* * *



# ध्वनौ वक्रोक्तेरन्तर्भावसमीक्षणम्

डा० मृदुला रायः

वक्रोक्तेर्विचारः यद्यपि सुप्राचीनस्तथापि वैदग्ध्यभङ्गीभणितिस्वभावायाः तस्याः प्रतिष्ठा आचार्येण कुन्तकेनैव वक्रोक्तिजीविते सुस्पष्टतया सम्पादिता । कविप्रतिभानिबन्धनमुक्तिवैचित्र्यमेव काव्यस्य परमं तत्त्वमिति तस्याभिमतम् ।

अस्याः वक्रोक्तेः माहात्म्यं कुन्तकपूर्ववर्त्तिना चिरन्तनाचार्येण भामहेनैव मर्यादापूर्वकं स्वीकृतम् "सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते । यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना" (काव्यालङ्कारः, २.८५) इत्यादिना वचनेन । वक्रोक्तिरित्यनेन शब्दार्थयोरुभयोरेव वक्रता तेनाङ्गीकृता । शब्दवक्रताया अर्थवक्रतायाश्च सम्मिलितरूपमेव भामहाचार्येण वक्रोक्तित्वेनाङ्गीकृतम् । वक्रोक्त्यभावात् हेतु-सूक्ष्म-लेशानामलङ्कारत्वं तेन न स्वीकृतम् ।

दण्डिना अतिशयोक्तिव्यपदेशेन वक्रोक्तेरात्मभूतं तत्त्वमुद्घाटितम् । अतिशयोक्तिरलङ्काराणां जननीस्वरूपा, तद्विनालङ्काराणामशोभनादिति तस्य मतम् । तेन वाङ्मयं द्विधा विभक्तम् – "द्विधा भिन्नं स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ।" (काव्यादर्शः, २.३६२) स्वभावोक्तौ वस्तुनः साक्षात् स्वरूपवर्णनं, वक्रोक्तौ चमत्कारपूर्णवर्णनमिति तस्याशयः ।

वामनाचार्येण "सादृश्याल्लक्षणा वक्रोक्तिः" (काव्यालङ्कारसूत्रवृत्तिः, ४.३.५) इति वदता सादृश्यनिबन्धनलक्षणानतिरिक्तं वक्रोक्तिस्वरूपमुक्तम्। तस्य वक्रोक्तिरर्थालङ्कार एव, न तु शब्दालङ्कारः । अत एव विशेषालङ्कारपर्यवसायिनी वक्रोक्तिः न खल्वलङ्काराणां प्राणभूतेति वामनस्याभिमतम् ।

रुद्रटाचार्येण विशेषालङ्काररूपेणैव वक्रोक्तिः स्वीकृता । अलङ्काररूपा वक्रोक्तिस्तेन द्विधा विभक्ता । तद्यथा काकुवक्रोक्तिः श्लेषवक्रोक्तिश्च ।

आचार्यस्यानन्दवर्धनस्य वक्रोक्तिरलङ्काररूपेण पर्यवसिता । तन्मते वक्रोक्तिरतिशयोक्तिपर्याया, कविप्रतिभायामेवास्याः चमत्कारिता । वक्रोक्तिजीविते ध्वनिसिद्धान्तस्य प्रतिध्वनिः सुस्पष्ट एव । ध्वनेरिव वक्रोक्तेर्विस्तारो वर्णप्रत्ययादारभ्य प्रबन्धं यावत् परिलक्षितः ।

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।"
(ध्वन्यालोकः, १.१३)

इत्यनेनानन्दवर्धनेन ध्वनेः स्वरूपं प्रदत्तम् । सः काव्यविशेष एव ध्वनिर्यत्रार्थ आत्मनं शब्दश्चाभिधेयमर्थं गौणीकृत्य प्रतीयमानमर्थं प्रकाशयतः । रमणीनां प्रसिद्धावयवातिरिक्तो लावण्यसदृशः प्रतीयमानोऽर्थो महाकवीनां वाणीषु विलसति । वाच्यातिरिक्तासौ विशिष्टार्थ अलौकिक-प्रतिभाजन्यः । प्रसिद्धकथनातिरिक्ता विचित्राऽभिधा वर्णनशैली वा कुन्तकसम्मता वक्रोक्तिः । प्रसिद्धकथनातिरिक्तेत्यनेन शास्त्रादौ उपनिबन्धयोः शब्दार्थयोः सामान्यप्रयोगात् भिन्नेति ज्ञायते । अत एव ध्वनौ वक्रोक्तौ च वाच्यवाचकयोरतिक्रमणं विद्यते । तस्य प्रमाणं 'उपसर्जनकृतस्वार्थौ', 'शास्त्रादिप्रसिद्धशब्दार्थोप-निबन्धव्यतिरेकी' इत्यादिषु दृश्यते । उभयत्र एवालौकिकी प्रतिभा स्वीकृता । कुन्तकमते वक्रत्वेन शब्दार्थयोः शोभा, ध्वनिकारमते व्यञ्जकत्वेन ।

उभये प्रस्थाने साम्ये परिलक्षितेऽपि मूलगतं किञ्चित् पार्थक्यं स्फुटमेव । कुन्तकमते वक्रोक्तिः मूलतया षड्विधा-वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता च । पदपूर्वार्धवक्रता पुनरष्टविधा-रुढिवैचित्र्यवक्रता, पर्यायवक्रता, उपचारवक्रता, विशेषणवक्रता, संवृतिवक्रता, वृत्तिवक्रता, लिङ्गवैचित्र्यवक्रता, क्रियावैचित्र्यवक्रता च । प्रायः सर्वेषामेतेषां ध्वनावन्तर्भावः सम्भवति । यथा रूढिवैचित्र्यवक्रता नाम अर्थान्तरसङ्क्रमितवाच्यध्वनेः रूपान्तरमात्रमेव । रूढिवैचित्र्यवक्रताया उदाहरणं कुन्तकेन ध्वन्यालोकादेव गृहीतम् । शब्दस्य नियतवृत्तिता नाम कश्चिद्धर्मो नाम रूढिरुच्यते । रोहणं रूढिरिति कृत्वा । सा च द्विप्रकारा सम्भवति-नियतसामान्यवृत्तिता नियतविशेषवृत्तिता च । तेन रूढिशब्देनात्र रूढिप्रधानः शब्दोऽभिधीयत धर्मधर्मिणोऽभेदोपचारदर्शनात् । यत्र लोकोत्तरतिरस्कारे प्रशंसायां बा रूढिशब्देनासम्भाव्यधर्मारोपगर्भतारूपं



सद्धर्मातिशयाध्यारोपगर्भतारूपं वा वैचित्र्यं प्रकाशितं भवति तत्रैव रूढिवैचित्र्यवक्रतायाः स्थानम् । अस्योदाहरणं यथा –

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद् वलाका घनाः
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ।।"
(वक्रोक्तिजीवितम्, २.९ उदाहरणम्)।

अत्र रामशब्देन 'दृढं कठोरहृदयः', सर्वं सहे इति विशेषार्थयोः प्रतिपादनम् । अपि तु वैदेहीपदेन जनककन्यारूपं साधारणधर्मातिरिक्तं सहजसौकुमार्यसुलभं कातर्यमभिव्यक्तम् । अत्र 'रामोऽस्मि' इत्यनेन सूचितस्यासाधारणधर्मस्य वक्ता रामः । 'वैदेही' इत्यत्र सूचितस्यासाधा-रणधर्मस्य वक्ता अपि रामः, न तु वैदेही । अत एवात्र एकस्मिन्नेव श्लोके 'असम्भाव्यधर्माध्यारोपगर्भता' सद्धर्मातिशयारोपगर्भता' इत्युभयोरेव दृष्टान्तम् । आचार्येणानन्दवर्धनेन अर्थान्तरसंक्रमितवाच्यध्वनेरुदाहरणरूपेण 'स्निग्धश्यामलकान्ति....' इति श्लोक उद्धृतः । अत्रार्थान्तरसंक्रमित-वाच्यस्योदाहरणं 'राम' इति पदम् । अस्य विशेषार्थस्तावत् सकलदुःखभाजनत्वं राज्यनिर्वासनपात्रत्वं सीताविरहभाजनत्वञ्च ।

पर्यायवक्रता पर्यायध्वनेः सदृशा एव, अयमेव शब्दशक्तिमूलानुरणन-रूपव्यङ्ग्यध्वनिः । किरातार्जुनीयस्य –

नाभियोक्तुमनृतं त्वमिष्यसे, कस्तपस्विविशाखेषु चादरः ।
सन्ति भूभृति हि नः शराः परे, ये पराक्रमवसूनि वज्रिणः ।।"
(२३.५८)।

इत्यत्र इन्द्रस्य सहस्रनामनि विद्यमानेऽपि 'वज्रिणः' इति पर्यायपदेन पर्यायवक्रता परिपुष्टा । यतः 'सततसन्निहितवज्रस्यापि सुरपतेर्ये पराक्रमवसूनि विक्रमधनानीति सायकानां लोकोत्तरत्वप्रतीतिः ।' (वक्रोक्तिजीवितम्, २.१२, वृत्तिः)। एवं सुभाषितवल्लयाः –

"इत्थं जडे जगति को नु वृहत्प्रमाणकर्णः करी ननु भवेत् ध्वनितस्य पात्रम् ।
इत्यागतं झटिति योऽनिलमुन्ममाथ मातङ्ग एव किमतः परमुच्यतेऽसौ ।।"
(वक्रोक्तिजीवितम्, २.१६, उदा.)।

इत्यत्र मातङ्गपदं श्लिष्टम् । अत्र चाण्डालरूपस्य द्वितीयार्थस्य संस्पर्शेन आगतया वाच्यार्थचारुतया पर्यायवक्रता परिपुष्टा । प्रस्तुतेनाप्रस्तुतस्य सम्बन्धनिरूपणं क्वचिद्रूपकेण क्वचिद्वोपमया भवति । कुन्तकमते अयमेव ध्वनिवादसम्मतस्य शब्दशक्तिमूलसंलक्ष्यक्रमव्यङ्ग्यपदध्वनेर्विषयः । संलक्ष्यक्रमव्यङ्ग्यरूपे ध्वनिकाव्ये व्यञ्जकव्यङ्ग्यप्रतीतः पौर्वापर्यं दृश्यते । रणनानुरणनसदृशोऽयं क्रमः । ध्वनिकाव्यस्यास्य त्रिविधा भेदाः- शब्दशक्तिमूलानुरणनरूपो व्यङ्ग्यध्वनिः, अर्थशक्तिमूलानुरणनरूपो व्यङ्ग्यध्वनिः, उभयशक्तिमूलानुरणनरूपो व्यङ्ग्यध्वनिश्च । शब्दशक्ति-मूलालङ्कारध्वनिः शब्दशक्तिमूलवस्तुध्वनिरितिभेदेन शब्दशक्तिमूलानुरणनरूपो व्यङ्ग्यध्वनिः द्विविधः । अलङ्काररूपस्य व्यङ्ग्यार्थस्य चमत्कारित्वे प्रथमप्रकारस्य, वस्तुमात्ररूपस्य व्यङ्ग्यार्थस्य चमत्कारित्वे द्वितीयप्रकारस्य ध्वनेर्विषयः । शब्दशक्तिमूलालङ्कारध्वनिर्यथा -

उल्लास्य कालकरवालमुखाम्बुवाहं देवेन येन जठरोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥"

अत्र राजा प्रासङ्गिकोऽर्थः, इन्द्रस्त्वप्रासङ्गिकः । अत्र शाब्दीव्यञ्जनाया विषयो व्यङ्ग्यार्थ एव । श्लोकस्य 'देवेन' इत्यत्र 'भूपेन' इति पदसन्निवेशे व्यङ्ग्यार्थस्यावकाश एव न विद्यते ।

उपचारवक्रता अत्यन्ततिरस्कृतवाच्यध्वनेः पर्यायरूपा एव । उभयत्रोपचारस्य लक्षणाया वा चमत्कारित्वम् । वक्रोक्तिजीविते उपचारवक्रतालक्षणं यथा -

"यत्र दूरान्तरेऽन्यस्मात् सामान्यमुपचर्यते ।
लेशेनापि भवेत् काञ्चिद्वक्तुमुद्रिक्तवृत्तिताम् ॥"
"यन्मूला सरसोल्लेखा रूपकादिरलङ्कृतिः ।
उपचारप्रधानासौ वक्रता काचिदुच्यते ॥"

(वक्रोक्तिजीवितम्, २.१३-१४)

वृत्तावेवमुक्तम् 'उपचरणमुपचारः, स एव प्रधानं यस्याः सा तथोक्ता ।' कस्यापि धर्मस्यातिशयप्रतिपादनाय उपचारेण गौणीवृत्त्या वा यदि अत्यन्तव्यवहिताप्रस्तुतपदार्थे विद्यमानं सामान्यमपि सादृश्यं वर्णितं भवति तत्रैवोपचारवक्रतायाः प्रसङ्गः । यथा 'स्निग्धश्यामलकान्ति......'



इत्यादि महानाटकस्थिते उदाहरणे स्निग्धेति पदे उपचारवक्रता । यथा मूर्त्तं वस्तु दर्शनस्पर्शनसंवेद्यस्नेहगुणयोगात् स्निग्धमित्युच्यते, तथैव कान्तिरमूर्त्ताऽप्यु-पचारात् स्निग्धेत्युक्ता । गौडवहस्य -

"गअणं च मत्तमेहं धारालुलिअज्जुणाइ अ वणाइ ।
णिरहंकारमिअका हरंति णीलाओ वि णिसाओ ॥"

(वक्रोक्तिजीवितम्, २.१३, उदाहरणम्)।

इत्युदाहरणे णिरहंकारमिति चेतनस्य सामान्यधर्म मेघे चन्द्रे चारोपितः । उल्लिखितोऽयं श्लोकः ध्वन्यालोके अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणरूपेण । मुख्यार्थे सर्वतः तिरस्कृते तु अत्यन्ततिरस्कृतवाच्यध्वनेः क्षेत्रम् । यथा -

"रविसंक्रान्तसौभाग्यस्तुषारावृतमण्डलम् ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥"

(ध्वन्यालोकः, २.१, उदाहरणम्)

इत्युदाहरणे पदार्थस्फुटीकरणाशक्तत्वाद् 'अन्ध'पदं दर्पणे लक्षितम् । इत्थं कुन्तकस्य वृत्तिवैचित्र्यवक्रता समासध्वनेः पर्यायरूपा । कुन्तकप्रदत्तं वृत्तिवैचित्र्यवक्रतायाः लक्षणम् -

"अव्ययीभावमुख्यानां वृत्तीनां रमणीयता ।
यत्रोल्लसति सा ज्ञेया वृत्तिवैचित्र्यवक्रता ॥"

(वक्रोक्तिजीवितम्, २.१९)।

अत्र अव्ययीभावादीनां वृत्तीनां सौन्दर्यं प्रकाशितं भवति । यथा -

"अभिव्यक्तिं तावद् बहिरलभमानः कथमपि
स्फुरन्नातः स्वात्मन्यधिकतरसम्मूर्च्छितभरः ।
मनोज्ञामुद्वृत्तां परपरिमलस्पन्दसुभगा-
मही धत्ते शोभामधिमधु लतानां नवरसः ॥"

(वक्रोक्तिजीवितम्, २.१९, उदाहरणम्)।

वसन्तवर्णनाया अस्मिन्नुदाहरणे अधिमधु इति पदे सप्तमीविभक्त्यर्थे 'अव्ययं विभक्तिसमीप.......' इत्यनेन सूत्रेणाव्ययीभावः समासः । मधौ इत्यनेनार्थबोधेऽपि 'अधिमधु' इति पदं सहृदयस्याह्लादजनकमतएवात्र वृत्तिवैचित्र्यवक्रतायाः क्षेत्रम् । एषा वृत्तिवैचित्र्यवक्रता समासध्वनेः तुल्या ।

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥"

(ध्वन्यालोकः, ३.१६, उदाहरणम्)

रामस्य शौर्यं दृष्ट्वा दर्पोन्मत्तस्य रावणस्योक्तिरियं हनुमन्नाटके दृश्यते । मेघनादेन इन्द्रविजयं किञ्चित् कल्पितकथनमिवेति शक्रजित् रूपेणोपपदसमासेन व्यक्तम् । येनेन्द्रोऽपि जितोऽभवत्, तस्य बलमप्यत्र कुण्ठितम् । स्वर्गग्रामटिकेति कर्मधारयसमासलब्धे पदे व्यञ्जकत्वं विद्यते । यः रावणः स्वर्गलोकमतितुच्छं ग्रामटिकारूपं मत्वा अनायासेन तमजयत् अद्य रामस्य समीपे तदभिमानमपि व्यर्थम् । इत्थमस्मिन् श्लोके प्रकृतिप्रत्ययादिभिः समासस्यापि व्यञ्जकता विद्यते । अतो ध्वनिकारेण समासध्वनेः या विवृत्तिः प्रदत्ता सा तु वस्तुततया वृत्तिवैचित्र्यवक्रतैव । इत्थं यथा कुन्तकस्य लिङ्गवैचित्र्यवक्रता आनन्दवर्धनस्य लिङ्गध्वनेर्यथा पदपूर्वार्धवक्रतायाः अन्येषां भेदानामपि ध्वनावन्तर्भावः सम्भवत्येव ।

कुन्तकमते कालवैचित्र्य-कारक-वचन-पुरुष-उपग्रह-प्रत्ययाश्चेतिरूपेण पदपरार्धवक्रता षड्विधा । उपसर्गनिपातभेदेन पदवक्रताया इतरभेदद्वयमपि सम्भवति । एषु पुरुषवक्रतामुपग्रहवक्रताञ्च व्यतिरिच्यान्येषां सर्वेषां स्पष्टतयोल्लेखोऽस्ति आनन्दवर्धनस्य -

"सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः ।
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥"

(ध्वन्यालोकः, ३.१६)।

इत्यत्र । कारिकास्थात् 'च'कारात् पुरुषवक्रताया उपग्रहवक्रतायाश्चान्तर्भावः सुसमञ्जसो भवति । कालकारकप्रत्ययादीनां चमत्कारत्वं आनन्दवर्धनेन व्यक्तिनिष्ठरूपेण स्वीकृत्य ध्वनेः भेदेषु परिगणितम् । कुन्तकेन तु एतेषां चमत्कारत्वं वस्तुनिष्ठरूपेण मत्वा वक्रताभेदेषु परिगणितम् । अतो दृष्टिभेदेऽपि चमत्कारितायां कोऽपि भेदो नास्ति ।

पदानां यावतीयं वक्रतावैचित्र्यमालोच्य पदसमूहरूपस्य वाक्यस्य वक्रतावैचित्र्यमप्यालोचितं कुन्तकेन । यतः वाक्यरचना पदार्थबोधपूर्विका



एव भवति तस्मात् प्रथमं वाच्यार्थवक्रताया वस्तुवक्रताया वा वैचित्र्यमपि विश्लेषितं कुन्तकेन । वस्तुवक्रतायाः लक्षणं यथा वक्रोक्तिजीविते-

"उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम् ।
वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता ॥"

(वक्रोक्तिजीवितम्, ३.१)।

"अपरा सहजाहार्यकविकौशलशालिनी ।
निर्मितिनूतनोल्लेखलोकातिक्रान्तगोचरा ॥"

(वक्रोक्तिजीवितम्, ३.२)।

स्वस्पन्दसुन्दरैः रमणीयशब्दैः वर्णनीयवस्तुनः या वक्रता सैव वस्तुवक्रता । एषु स्थलेषु उपमादीनां वाच्यालङ्काराणां प्रयोगाधिक्यं न विद्यते । यतः तेषु तेषु स्थलेषु पदार्थानां स्वाभाविकसौन्दर्यं परिस्फुरितं न भवति । उपमादीनां वाच्यालङ्काराणां प्रयोगाधिक्येन रमणीयपदार्थानां सौन्दर्यपरिस्फुटने न्यूनतायाः सम्भावना भवति । तस्माद् रमणीयैः शब्दैः अस्यां वस्तुवक्रतायां वस्तूनां स्वाभाविकस्वरूपाणां वर्णना विधेया ।

"तां प्राङ्मुखीं तत्र निवेश्य तन्वीं क्षणं व्यलम्बन्त पुरो निषण्णाः ।
भूतार्थशोभाह्रियमाणनेत्राः प्रसाधने सन्निहितेऽपि नार्यः ॥"

(कुमारसम्भवम्, ७.१३)।

इत्यस्मिन् श्लोके पार्वत्याः स्वाभाविकरमणीयताप्रतिपादनमेव कवेरभिप्रायः । तस्माद् भूषणादिना सज्जितायाः पार्वत्याः स्वाभाविकसौन्दर्यस्य मालिन्यसम्भावनायां प्रसाधने सन्निहितेऽपि सम्मुखे उपविष्टाः सख्यः । इत्थं यदा वस्तुनः स्वाभाविकसौन्दर्यवर्णनमेव कवेरभिप्रायः स्यात्तदा अधिकालङ्काररचनं न समीचीनमिति कुन्तकस्याभिप्रायः । कवेः सहजातस्याहार्यस्य वा नैपुण्येन यदा पदार्थस्य लोकप्रसिद्धस्यार्थस्यातिक्रमणं स्यात्तदा कुन्तकसम्मता अपरविधा वस्तुवक्रता । केवलं सत्तामात्रे प्रतीते पदार्थे कविरेवंरूपां विशेषतामुत्पादयति येन लौकिकोऽपि पदार्थः सहृदयहृदयहारिणीमपूर्वां रमणीयतां प्राप्नोति ।

"लीनं वस्तूनि येन सूक्ष्मसुभगं तत्त्वं गिरा कृष्यते
निर्मातुं प्रभवेन्मनोरममिदं वाचैव यो वा बहिः ।

वन्दे द्वावपि तावहं कविवरौ वन्देतरां तं पुर-
यो विज्ञातपरिश्रमोऽयमनयोभारावतारक्षमः ॥"

(वक्रोक्तिजीवितम्, २.३३, उदाहरणम्)।

वस्तुनोऽन्तर्निहितं सूक्ष्मं सुन्दरञ्च तत्त्वं य वाक्येन काव्ये प्रकाशयति एवंविधं सत्काव्यनिर्मातारं महाकविं परिदृश्यमानस्य जगतः स्रष्टारं कविसार्वभौमं परमात्मानञ्च नमामि । एवं जगत्स्रष्टा-सत्काव्यनिर्मात्रोः श्रमं बोधपूर्वकं प्रशंसयति य, तं भावककविं विद्वांसमपि नमामि । इत्थमत्र वर्णनीयस्य पदार्थस्य नवीनं लोकोत्तरं सौन्दर्यं परिस्फुरितम् । स्वप्रतिभया लौकिके पदार्थे सौन्दर्यस्यालौकिकस्य सर्जनात् कवेरपि प्रजापतितुल्यत्वम् । काव्यात्मारूपस्य सहृदयश्लाघ्यस्यार्थस्य वाच्यप्रतीयमानाख्यौ द्वौ भेदौ ध्वनिकारसम्मतौ । वाच्यार्थद्योत्यो प्रतीयमानार्थोऽपि द्विविधःलौकिकः काव्यमात्रगोचरश्च । लौकिकस्य प्रतीयमानस्य विधिनिषेधादयो विविधाः भेदाः, ते वस्तुशब्देनाप्याख्यातव्याः । लौकिकोऽपि प्रतीयमानोऽलङ्कारध्वनि-वस्तुध्वनिरूपेण द्विविधः । वाक्यार्थे उपमादिरूपेण पूर्वमवस्थितेऽपि यदि तस्याधुना प्रतीयमानार्थस्यालङ्काररूपता न स्यात्तर्हि सोऽलङ्कारध्वनिः। यः प्रतीयमानार्थः कदाप्यलङ्काररूपतां न प्राप्तवान् स वस्तुमात्रध्वनिः । मात्रशब्देनात्रास्यालङ्कारध्वनेः पार्थक्यं सूचितम् । वृत्तिकारो वस्त्वलङ्काररसभेदेन ध्वनेः त्रैविध्यं स्वीकृत्य तस्य सामान्यलक्षणं कृतवान्, 'वाच्यादन्यत्वमिति' । अभिनवगुप्ताचार्यस्य मते तु रसध्वनिरेव काव्यस्यात्मा । वस्तुध्वनिरलङ्कारध्वनिश्च रसध्वनौपर्यस्येते । कुन्तकस्य वस्तुवक्रता अंशतया वस्तुध्वनिरेव । कुन्तकमते वस्तुसौन्दर्यस्य प्रतिपादनं वाच्यरूपेणापि सम्भवति, आनन्दवर्धनमते तु तत्केवलं व्यङ्ग्यरूपमेव । अतः यावत् कुन्तकस्य वस्तुवक्रताया आधारो व्यङ्ग्यस्तावत् स वस्तुध्वनिरेव । कुन्तकस्य वाक्यवक्रता आनन्दवर्धनस्यालङ्कारध्वनावेवान्तर्भवति । वाक्यवक्रतायाः लक्षणमाह कुन्तकः -

"वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा ।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ॥"

(वक्रोक्तिजीवितम् १.२०)।

वर्णनभङ्ग्या वैचित्र्यमेव वाक्यवक्रता । अस्यां वाक्यवक्रताया-



मुपमादीनां प्रसिद्धानां सर्वेषामलङ्काराणामन्तर्भावः स्यात् ।

"उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः ।
त्वामाश्रयं प्राप्य तया नु कोपात् सोढाऽस्मि न त्वद्भवने वसन्ती।।"

(रघुवंशम् १४.६०)।

निर्वासनकाले राममुद्दिश्य विह्वलायाः सीतायाः वार्तेयम् । वनवाससमये लक्ष्मीं परित्यज्य यां सीतां गृहीतवान् रामः, तां लक्ष्मीं सम्प्राप्याधुना तस्याः सीतायाः निर्वासनम् 'उचितमनुचितं वा विदितव्यवहारपरम्परेण भवता स्वयमेव विचार्यताम् ।' (वक्रोक्तिजीवितम्, १.२०, वृत्तिः)।

कुन्तकमते वक्रोक्तेः षड्विधेषु भेदेषु वाक्यवक्रता अनन्तरूपा । शब्दार्थगुणालङ्काररूपात् सौन्दर्याद् भिन्नं काव्यनिर्मातुरपूर्वं वर्णनमेव वाक्यवक्रतायाः जीवितम् । यथालेख्ये फलकादिसाधनसमूहमतिरिच्य चित्रकारस्य निर्माणकौशलमेकं पृथग्रूपेण प्रतीयते तथा समस्तान् पदार्थानतिरिच्य काव्यस्य प्राणस्वरूपस्य सहृदयसंवेद्यरूपस्य कविकौशलस्य या वक्रता सैव वाक्यवक्रता । "......वाक्यस्य मार्गादिप्रकृतपदार्थसार्थव्यतिरेकि कविकौशललक्षणं किमपि सहृदयसंवेद्यं सकलप्रस्तुतपदार्थस्फुरितभूतं वक्रत्वम् ....." (वक्रोक्तिजीवितम्, ३.४, वृत्तिः)। प्रसङ्गेऽस्मिन् वाक्पतिराजस्य गौडवहकाव्यादुद्धृतः कश्चित् श्लोक आचार्येण कुन्तकेन । तस्येयं संस्कृतच्छाया -

"आसंसारं कविपुङ्गवैः प्रतिदिवसगृहीतसारोऽपि ।
आद्याप्यभिन्नमुद्र इव जयति वाचां परिस्पन्दः ॥"

(वक्रोक्तिजीवितम्, ३.४, उदाहरणम्)।

अत्र 'सुसङ्गतेऽपि वाक्यार्थे कविकौशलस्य विलसितं किमप्यलौकिकमेव परिस्फुरति ।' (वक्रोक्तिजीवितम्, ३.४, वृत्तिः)। अत्र कविप्रतिभया यथार्थतत्त्वोद्घाटनरूपोऽलौकिकव्यापारोऽपि सूचितः । 'मत्प्रतिभोद्घाटितपरमार्थस्येदानीमेव मुद्राबन्धोद्भेदो भविष्यतीति लोकोत्तरस्वपरिस्पन्दसाफल्यापत्तेर्वाक्यपरिस्पन्दः.....'(वक्रोक्तिजीवितम्, ३.४, वृत्तिः) इत्यनेन वचनेन । अत एव वाक्यवक्रतायाः नियतत्त्वं न सम्भवति कविप्रतिभाया आनन्त्यात् । वाक्यवक्रतायामस्यामर्थालङ्कारमपि सन्निवेशयति

कुन्तकः । तेन रूपकव्यतिरेकादीनामलङ्कारविशेषाणां प्रतीयमानत्वं स्वीकृतम् । स्पष्टतया प्रतीयमानालङ्कारोऽलङ्कारध्वनिरेवैषः । कुन्तकस्य प्रतीयमान-रूपकस्यानन्दवर्धनस्य रूपकध्वनेश्चोदाहरणमपि सममेव ।

"लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे सरसायताक्षि ।
क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जलराशिरयं पयोधिः ॥"

(ध्वन्यालोकः, २.२७, वृत्तिः)।

अत्र मुखे चन्द्रारोपो न साक्षात् किन्तु प्रतीयमानरूपः । अत्रोदाहरणे जलराशिरिति पदे 'डलयोरभेदः' इत्येन नियमेन समुद्रो जडराशिरपि भवति । कथं समुद्रस्य जडत्वं ? यतः नायिकायाः रूपलावण्येन दिङ्मण्डले उद्भासितेऽपि समुद्रः शान्तः । अतः समुद्रो न सहृदयः, स केवलं जडतायाः समूह एव । अत्र मुखे चन्द्रमाया आरोपत्वात् प्रतीयमानरूपकत्वम् । आनन्दवर्धनस्त्वत्र वाच्यार्थविश्रान्तत्वात् रूपकध्वनिमेव स्वीकृतवान् । "इत्येवंविधे विषयेऽनुरणनरूपरूपकाश्रयेण काव्यचारुत्वव्यवस्थानाद्रूपक-ध्वनिरिति व्यपदेशो न्याय्यः ।" (ध्वन्यालोकः, २.२७, वृत्तिः) उदाहरणेऽस्मिन् श्लेषो वाच्यः, किन्तु न स व्यञ्जकः । व्यङ्ग्यस्त्वत्र रूपक एव । अर्थशक्त्याऽत्रानुरणनरूपो रूपकालङ्कारो व्यञ्जितः । एवमस्मिन् व्यञ्जनाश्रये चारुत्वमेवास्य । पक्षान्तरे दीपकादावलङ्कारे उपमाया आभासेऽपि यतस्तत्र चारुता न व्यङ्ग्याश्रयी तस्मात्तत्र न ध्वनेरवकाशः । वाच्यस्य यदि व्यङ्ग्यप्रतिपादने उन्मुखता न स्यात्तर्हि न तद् ध्वनेः क्षेत्रम् । "अलङ्कारान्तरेषु त्वनुरणनरूपालङ्कारप्रतीतौ सत्यामपि यत्र वाच्यस्य व्यङ्ग्यप्रतिपादनौन्मुख्येन चारुत्वं न प्रकाशते न स ध्वनेर्मार्गः । तथा च दीपकादावलङ्कारे उपमाया गम्यमानत्वेऽपि तत्परत्वेन चारुत्वस्याव्यवस्थानान्न ध्वनिव्यपदेशः ।" (ध्वन्यालोकः, २.२६, वृत्तिः)।

इत्थं कुन्तकस्य प्रबन्धवक्रतालक्षणं यथा -

"वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः ।
उच्यते सहजाहार्यसौकुमार्यमनोहरः ॥"

(वक्रोक्तिजीवितम्, १.२१)।



वाक्यसमुदायात्मके प्रकरणे प्रकरणसमुदायात्मके प्रबन्धे वा सहजेनाहार्येण वा सौकुमार्येण मनोहरो वक्रभाव आयाति । महाकविवर्णिते कस्मिन् रामकथामूलके नाटके वर्णविन्यास-पदपूर्वार्ध-प्रत्यय-वाक्य-प्रकरणभेदेन वक्रतापञ्चकेन सहृदयहृदयहारि-महापुरुषवर्णने परिदृष्टेऽपि न तत्र महापुरुषचरितवर्णनमात्रमेव कवेरुद्देश्यं भवति, किन्तु रामसदृशमाचरणीयं न रावणादिवदेवंरूपो विधिनिषेधात्मको धर्मोपदेशो ह्यत्र परमार्थः ।" "कुत्रचित् कविविरचिते रामकथोपनिबन्धे नाटकादौ पञ्चविध-वक्रतासामग्रीसमुदायसुन्दरं सहृदयहृदयहारि-महापुरुषवर्णनमुपक्रमे प्रतिभासते । परामार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवद्वर्त्तितव्यं न रावणवदिति ।" (वक्रोक्तिजीवितम्, १.२१, वृत्तिः)। परमार्थरूपा प्रबन्धवक्रता एव प्रबन्धध्वनिः। प्रबन्धवक्रतायाः षड्विधेषु भेदेषु षष्ठभेदस्य लक्षणं यथा -

"अप्येककक्षया बद्धाः काव्यबन्धाः कवीश्वरैः ।
पुष्णन्त्यनर्घामन्योन्यवैलक्षण्येन वक्रताम् ॥"

(वक्रोक्तिजीवितम्, ४.२५)।

सममेव वस्तु आश्रित्य विरचितेऽपि महाकवीनां रचनाः परस्परविलक्षणाः सन्तोऽपूर्वां वक्रतां पोषयन्ति । राजपुत्राणां पाठकादीनां वा शिक्षाप्रदानार्थमितिहासप्रसिद्धस्य कथाशरीरस्य मुख्यरसमुपेक्ष्यैवेतररसेन कथापरिसमाप्तावपि प्रबन्धवक्रता भवति । यथा रामायणे महाभारते च शान्तस्य वीरादीनां वा रसानामवस्थानेऽप्युत्तररामचरिते करुणरसस्य वेणीसंहारे वीररसस्य च प्राधान्यमुपलभ्यते । इयमेव प्रबन्धवक्रता । पदैकदेशादारभ्य प्रबन्धं यावद् ध्वनेः व्याप्तिप्रसङ्गे आनन्दवर्धन आह -

"यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये संघटनायाञ्च स प्रबन्धेऽपि दीप्यते ॥"

(ध्वन्यालोकः, ३.२)।

रामायणे महाभारते च प्रबन्धात्मकोऽसंलक्ष्यक्रमव्यङ्ग्यध्वनिः प्रकटितः प्रसिद्धश्च । प्रबन्धान्तरे विवक्षितान्यपरवाच्यध्वनेरनुरणनरूपो व्यङ्ग्यप्रभेदोऽपि परिदृश्यते । तदुक्तं लोचने, "प्रबन्धेन कदाचिदनुरणन-रूपव्यङ्ग्यो ध्वनिः साक्षाद् व्यज्यते स तु रसादिध्वनौ पर्यवस्यतीति ।"

(३.१४)। एतत्प्रसङ्गे कुन्तकेनोक्तम्, '.........प्रबन्धेषु कवीन्द्राणां कीर्त्तिकन्देषु किं पुनः ।' (वक्रोक्तिजीवितम्, ४.२६, अन्तरश्लोकः)। अन्यत्राप्याह स-

"निरन्तररसोद्गारगर्भसन्दर्भनिर्भरः ।
गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः ।।"

(वक्रोक्तिजीवितम्, ४.४ अन्तरश्लोकः)।

अतः कुन्तकानुसारेण काव्यस्य सर्वोत्कृष्टो रूपो हि प्रबन्धः । प्रबन्धस्य प्राणास्तु रसः । यथा ध्वन्यालोके तथा वक्रोक्तिजीवितेऽपि काव्यस्य प्राणतत्त्वरूपेण रसः स्वीकृतः । रसस्य व्यङ्ग्यत्वमप्युभयत्रैव स्वीकृतम् ।

अतः सिद्धान्तरूपेण वक्तुं शक्नुमः यत् शास्त्रादिप्रसिद्धशब्दव्यतिरिक्तं विवक्षितार्थवाचकञ्च शब्दस्य यत् स्वरूपं कुन्तकेनालोचितं तद् व्यञ्जकात् शब्दान्न भिन्नमिति । व्यञ्जकं शब्दं व्यङ्ग्यमर्थं व्यञ्जनाव्यापारञ्च वक्रोक्तेर्भेदरूपेण स्वीकुर्वन् कुन्तकः ध्वनेः सर्वस्वं वक्रोक्तावेवान्तर्भावयतीति स्पष्टम् । तथा सत्युपसर्जनीकृतस्वार्थशब्दार्थात्मकं ध्वनिलक्षणमेवोज्जीवितं कुन्तकेनेति दिक् ।

<u>**सहायकग्रन्थसूची**</u>


१) ध्वन्यालोकः - सम्पादकः रामसागर त्रिपाठी, १९७९
२) ध्वन्यालोक ओ लोचन - अनुवादकः सुबोधचन्द्र सेनगुप्त, १९८६
३) काव्यादर्शः - सम्पादकः रामपद भट्टाचार्य, १९७४
४) काव्यालङ्कारसूत्रवृत्तिः - व्याख्याकारः केदारनाथ शर्मा, १९८९
५) काव्यालङ्कारः (रुद्रटः) - सम्पादकः पं० दुर्गाप्रसादः, १९८३
६) वक्रोक्तिजीवितम् - सम्पादकः डॉ० नगेन्द्र
७) वक्रोक्तिजीवितम् - सम्पादकः रविशङ्कर वन्द्योपाध्याय, १३९३ वङ्गाब्दः


* * *



# श्रीमद्भगवद्गीतायां सादृश्यकथनम्

डा० मञ्जू कुमारी

संस्कृतवाङ्मयस्य काव्येषु काव्यस्य शरीरभूतौ शब्दार्थौ अलङ्कर्तुं तदात्मभूतस्य रसस्य महदुपकारतामावोढुं लोकोत्तराह्लादं संवर्धयितुं वा सादृश्यवर्णनं सुविदितम् । प्राचीनतमे ग्रन्थे ऋग्वेदे नदीपर्वतादीनां प्राकृतिकचित्रणानां रमणीयतां प्रतिपादयितुं विविधानामप्रस्तुतानां प्रयोगः दृश्यते । यथा उषसः प्रस्तुतं सौन्दर्यं वर्णयितुं 'नवयौवना नर्तकी' इत्यस्याप्रस्तुतस्य साहाय्येन प्रस्तुतविषयस्य सजीवत्वं स्फुटितं वर्तते । इत्थमेव नदीसूक्तेऽपि 'उपस्थादश्ववे इव' तथा 'गावेव शुभ्रे'[1] इत्यादिषु स्थलेषु नद्योः प्रवाहवर्णने अविद्यमानानां गवादीनाम् उपस्थापनं सम्मिलितं वर्तते । न केवलं प्राकृतिकचित्रणेष्वेव अपितु गहनदार्शनिकविचाराणां प्रतिपादनेऽपि प्राचीनतमेषु ग्रन्थेषु प्रस्तुताप्रस्तुतानां सादृश्यकथनेन प्रस्तुतस्य सरलमुपस्थापनं प्राप्यते यथा -

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति ।।[2]

मन्त्रेऽस्मिन् दर्शनशास्त्रस्य मौलिकतत्त्वानां प्रतिपादनं सादृश्यमाध्यमेन सारल्येन प्रस्तोतुं प्रकृत्या अश्वत्थवृक्षस्य च साम्यं प्रदर्श्यते । पुनः अत्र ईश्वरः जीवश्च द्वौ पक्षिणौ स्तः यौ सहैव मित्ररूपेण एकस्मिन्नेव वृक्षे (प्रकृत्यां) स्थितौ स्तः । परन्तु तयोः प्रथमः (जीवः) तस्य वृक्षस्य फलान् खादति किं वा स्वकर्मणां सुखदुःखरूपफलानि खादति, अपरश्चेश्वरः वृक्षस्य फलान्यखादयन्नेव विश्वस्मिन् सर्वत्र स्वसौन्दर्यं प्रकाशयति । अत्र जीवेश्वरप्रकृतेश्च खगवृक्षादिना सह सादृश्यप्रदर्शनेन जीवस्य भोक्तृत्वमीश्वरस्य चाभोक्तृत्वं गूढं भूत्वाऽपि सारल्येन मत्यामागच्छति ।

इत्थम् अन्यत्रापि उपनिषत्सु "आत्मानं रथिनं विद्धि शरीरं रथमेव च"[3] "इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्"[4] इत्यादिषु रथाश्वादीनामप्रस्तुतानां प्रयोगः प्रस्तुतविषयस्य सारल्येन प्रतिपादनार्थं प्राप्यते "यथोर्णनाभिः सृजते गृह्णते च"[5] मन्त्रे ऊर्णनाभेः कार्येण ब्रह्मणः कार्यस्य सादृश्यकथनेन कठिना सृष्टिप्रक्रिया सरलतया बिम्बिता भवति ।

इत्थं प्राचीनग्रन्थेषु सादृश्यकथनानां महत्त्वमस्त्येव इतिहासपुराण-सांख्ययोगवेदान्तसङ्गीतायुर्वेदज्योतिषप्रभृतिषु शास्त्रेषु सादृश्यकथनानां प्रयोगः सौकर्येण दरीदृश्यते । प्रसङ्गेऽस्मिन् गीतायां सादृश्यकथनानि द्रष्टव्यानि सन्ति ।

यद्यपि गीता स्वतन्त्ररूपेण दार्शनिकतत्त्वानां प्रतिपादिका मन्यते, उपनिषद् इत्यभिधानेन गीतायाः शुचिता दार्शनिकता चोद्घाट्यते तथापि गीता महाभारतस्य आर्षकाव्यस्य प्रकरणमेव विद्यते । तत्र कौरवपाण्डवयोः सेने यदा परस्परं योद्धुमुद्यते भवतः तदैव स्वबान्धवजनान् गुरून् च प्रतिपक्षे सम्मुखं दृष्ट्वार्जुनः युद्धविमुखो भवति । यस्यां परिस्थित्यां गीता प्रणीता तस्यां किं कर्त्तव्यं किञ्चाकर्त्तव्यमिति निर्देष्टव्यमासीत् । किंकर्त्तव्यविमूढमर्जुनं प्रेरयितुं तं स्वकार्ये नियोक्तुञ्च ब्रह्मणः व्यापकत्वं जगतः नश्वरत्वमात्मनश्चामरत्वादयः विषयाः सहजतया उपस्थापयितव्या आसन् । एतदर्थं तत्र विविधानि सादृश्यकथनानि प्रयुक्तानि विद्यन्ते । पुनश्च विविधान्यप्रस्तुतानि प्रयुक्तानि सन्ति । यथा -

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।।२.२२

अत्र सर्वसुलभजीर्णपटपरिवर्तनकथनेनात्मनः नित्यत्वं पुनर्जन्मनश्च सिद्धान्तौ उपस्थापितौ स्तः । इत्थमेव -

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ।। १५.८

अत्रोक्तमस्ति यत् येन प्रकारेण पवनः गन्धपूर्णात् स्थानादन्यत्र गमनकाले गन्धमपि वहति तथैव देहान्तरप्राप्तिकाले जीवात्मा एकस्मात् शरीरात् मनःसहितानीन्द्रियाणि गृहीत्वा एवापरस्मिन् शरीरे प्रविष्टो भवति । गन्धवायोः प्रयोगेणात्र जीवात्मगतिः विषयः सारल्येन प्रस्तुतो भवति ।



चञ्चलं हि मनः कृष्णः प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ।। ६.३४

अत्र मनोवाय्वोः सादृश्योपस्थापनेन मनसः स्वाभाविकं वर्णनं भवति ।

गीतायां प्रयुक्तेष्वप्रस्तुतेषु इदं स्पष्टं भवति यत् तत्र द्विविधानाम-प्रस्तुतानां प्रयोगो वर्तते । यथा -

**लौकिकानि** -एतेष्वेतादृशान्यप्रस्तुतानि विद्यन्ते यानि लोके सहजतया अवलोक्यन्ते । सामान्यजीवने तेषां प्रयोगो भवति तथा च एतैः व्यावहारिकरूपेण साक्षात् सम्बन्धो भवति । केचन निम्नलिखिताः सन्ति –

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ।।
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ।। ३.३८
यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।। ४.३७
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।। ५.१०
यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।। २.४६
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।। २.५८
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ।।

अनेन प्रकारेण वस्त्रम्, धूमः, अग्निः, तडागः, दीपकः, दर्पणम्, जलम्, नद्यः, समुद्रः, उल्बम्, कमलपत्रम्, सूर्यः, गगनम्, वृक्षः, कूर्मः, पतङ्गः इत्यादयः लौकिकाः अप्रस्तुतरूपेण व्यवहृताः वर्तन्ते ।

**अलौकिकानि**–एतेष्वेतादृशान्यप्रस्तुतानि विद्यन्ते यानि लोके नावलोक्यन्ते । एषां वर्णनं काल्पनिकं प्रतीयते । यथा –

रुद्रादित्या वसवो ये च साध्या
विश्वेश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घा
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥ ११.२२-२५
नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो॥
दंष्ट्राकरालानि च ते मुखानि ० इत्यादयः

एतेष्वलौकिकेषु अप्रस्तुतेषु रुद्रः, मरुत; यक्षः, गन्धर्वः, देवेशः, इन्द्रलोकः, स्वर्गलोकः इत्यादयः प्रमुखाः ।

इत्थं यद्यपि गीतायां द्विविधान्यप्रस्तुतानि प्राप्यन्ते तथापि गूढतमं दार्शनिकं तत्त्वं (प्रस्तुतं) दृढ़तया प्रस्तोतुं लौकिकाप्रस्तुतानां द्वारा प्रस्तुतकथनं सरलतरं विद्यते । यथा ईश्वरस्य व्यापकत्वं प्रदर्शयताऽर्जुनेन उक्तम् –

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥
त्वमादिदेवः पुरुषः पुराण -
स्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ११.३७-३८

अत्र ब्रह्मणः आदिकर्ता, आदिदेवः, सनातनः देवेश, परमधाम, परमाश्रय इत्यादिविशेषणैः ईश्वरस्य व्यापकत्वं प्रदर्शितं विद्यते । किन्तु ईश्वरस्य अनन्तरूपं सामान्यतया बोधयितुं लौकिकाप्रस्तुतव्यवहारेण सरलता भवति । यथा –

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोक्तं सूत्रे मणिगणा इव ॥ ७.७



अत्र सूत्रे ग्रथितानां मणीनां सादृश्यकथनेन ईश्वरस्य जगद्व्यापकत्वं सारल्येन अवगम्यते । पुनश्च –

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ९.६

अर्थात् येन प्रकारेण सर्वत्र संचरणशीलो वायुः गगने सर्वदा विद्यमानो भवति तथैव सर्वाणि भूतानि सर्वव्यापके ईश्वरे स्थिताः सन्ति । अत्रापि सादृश्यप्रयोगेण व्यापकत्वनिरूपणं सरलतरं वर्तते ।

सर्वव्यापकं भूत्वाऽपि ब्रह्म जीवस्य कर्मप्रभावैः निर्लिप्तं तिष्ठति । इदं प्रतिपादयितुं तस्य अनादिरूपस्यनिर्गुणरूपस्य चावलम्बनं स्वीकृत्य निर्गुणत्वादि अद्रष्टव्यानामप्रस्तुतानां व्यवहारे सत्यपि निर्लिप्तता स्पष्टा न भवति ।

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ १३.३१

परन्तु तत्रैव लौकिकाप्रस्तुतेन सादृश्यकथनेन च ब्रह्मणः निर्लिप्तता सूक्ष्मतया सरलरूपेण स्पष्टं भवति –

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ १३.३२

अत्र आकाशस्य व्यापकत्वेन निर्लिप्ततया च देहस्थितात्मनः व्यापकत्वं निर्लिप्तत्वञ्च सारल्येन बोधितं भवति ।

<u>सन्दर्भः</u>

1. ऋग्वेदः 3.33
2. मुण्डकोपनिषद् – 3.1
3. कठोपनिषद् – 1.3.3
4. ,, – 1.3.4
5. मुण्डकोपनिषद् – 1.1.7

* * *

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते ।
अ० = अष्टाध्यायी । वा० = वार्तिकम्

उपदेशः — उपदेशः परार्थः प्रयोगः । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्ति उपदेश इति सोऽस्य विषयः ।
अ० अदोऽनुपदेशे 1.4.70

अन्तर्द्धिः — अन्तर्द्धिः व्यवधानम् ।
अ० तिरोऽन्तर्द्धौ 1.4.71

अत्याधानम् — अत्याधानम् उपश्लेषणम् ।
अ० अनत्याधान उरसिमनसी 1.4.75

निवचनम् — निवचमं वचनाभावः ।
अ० मध्येपदेनिवचने च 1.4.76

उपयमनम् — उपयमनं दारकर्म ।
अ० नित्यं हस्ते पाणावुपयमने 1.4.77

हीनः — हीन इति न्यून उच्यते ।
अ० हीने 1.4.86

वर्जनम् — प्रकृतेन सम्बन्धिना कस्यचिद् अनभिसम्बन्धो वर्जनम् ।
अ० अपपरी वर्जने 1.4.88

मर्यादा — अवधिर्मर्यादा वचनग्रहणादभिविधिरपि गृह्यते ।
अ० आङ् मर्यादावचने 1.4.89

भागः — भागः स्वीक्रियमाणः अंशः यदत्र मम अभिष्यात् तद्दीयताम् । यदत्र मम भवति तद्दीयतामित्यर्थः ।
अ० अभिरभागे 1.4.91

प्रतिनिधिः — मुख्यसदृशः प्रतिनिधिः ।

प्रतिदानम् — दत्तस्य प्रतिनिर्यातनं प्रतिदानम् ।
अ० प्रतिः प्रतिनिधिप्रतिदानयोः 1.4.92



# व्यक्तिविवेके निपातोपसर्गयोः वाचकत्वद्योतकत्वविमर्शः

डा० अरुणकुमारमण्डलः

आचार्यस्य महिमभट्टस्य व्यक्तिविवेको नाम व्याकरण-दर्शन-साहित्य-तत्त्वानामतिगम्भीरः कुशाग्रधीषणक्षोदनीयो ग्रन्थः । ग्रन्थस्यास्य बहुषु स्थलेषु महिम्नोऽनेके मौलिकाः सिद्धान्तास्तार्किकोपज्ञया प्रतिभयोपनिबद्धाः सन्ति । प्रस्तुते सन्दर्भे तस्य निपातोपसर्गविषयिणी विचारसरणी यथामत्युपस्थाप्यते ।

संस्कृतवाङ्मये केचिदुपसर्गाणां वाचकत्वं केचिद्द्योतकत्वञ्च स्वीकुर्वन्ति । वाचकत्ववादिनः ब्रुवन्ति सन्त्युपसर्गाणां स्वकीया अर्थाः । तेषामर्थानां वाचका उपसर्गाः । द्योतकत्ववादिनस्त्वाहुः - न सन्त्युपसर्गाणां स्वकीया अर्थाः । यैः संयुक्ताः भवन्त्युपसर्गाः तेषामर्थानां विशेषत्वं प्रकटयन्ति केवलमेते । नैरुक्ते प्रथमं गार्ग्यमतरूपेण, द्वितीयं शाकटायनमतरूपेण च प्रसिद्धम् । यास्काचार्यः निपातोपसर्गाणां वाचकत्वमेव समर्थयन् 'आ इत्यर्वागर्थे । प्र, परा इत्येतस्य प्रातिलोम्यम्......' इत्यादिना 'एवमुच्चावचेष्वर्थेषु निपतन्ति । त उपेक्षितव्याः' इत्यन्तं यावत् सुस्पष्टवचनेन निरुक्तस्य तृतीये खण्डे उपसर्गाणां, चतुर्थे च खण्डे उपमार्थक-कर्मोपसंग्रहार्थक-पादपूरकार्थकभेदेन त्रिविधानां निपातानां दिङ्निर्णयरूपमर्थविवेचनं कृतवान् ।

महिमभट्ट आह-"असत्त्वभूतार्था उपसर्गादयः । तेषामसत्त्वभूतार्थत्वाविशेषेऽपि व्यापारनियमात् प्रयोगनियमाच्च त्रैराश्योपगमः । तथा हि - क्रियारूपातिशयप्रतिपत्तिनिबन्धनमुपसर्गाः प्रादयः । भावसत्त्वयोरात्मभेद-प्रत्यायननिमित्तमवधृतरूपार्थविशेषाः स्वरादयो निपाताः । क्रियाविशेषोपजनित-

सम्बन्धावच्छेदहेतवः कर्मप्रवचनीयाः ।" (व्यक्तिविवेकः, प्रथमो विमर्शः, पृ० ४५-६)। निपातोपसर्गकर्मप्रवचनीयानामितरेतरेष्ववान्तरविशेषत्वेऽपि स्वस्वरूपेऽसिद्धा एते । प्रादय उपसर्गाः क्रियाभिरयुक्तेषु विशिष्टानर्थान्न प्रकटयन्ति । एवं चादयो निपाता अपि स्वतन्त्रतया प्रयुक्ताः सन्तो भावं न प्रकटयन्ति । एतदेवोपसर्गादीनामसिद्धस्वभावत्वं-यत् खलु निपातोपसर्ग-कर्मप्रवचनीयानां सामान्यलक्षणम् । एतेषामवान्तरवैलक्षण्यन्तु द्विविधं प्रोक्तं - व्यापारमूलं प्रयोगमूलञ्च । (१) व्यापारानुसारेणोपसर्गाः क्रियार्थान् विशेषयन्ति । प्रयोगानुसारेण त्वेते धातोः प्राक् प्रयुज्यन्ते । यथा 'हृ'धातुर्हरत्यर्थे प्रयुज्यते । तत्र 'प्र'योगेन प्रहार, 'आ'योगेनाहारः 'सं'योगेन संहारादयोऽर्था भवन्ति । पुनर्विहरतीत्यादिषु प्रयोगेषु 'वि'इत्यस्योपसर्गस्य स्थितिर्हरतेः पूर्वमेव भवति; न परम् । तस्माद् 'हरति वि' इत्यादयो न प्रयोगार्हाः । उक्तञ्च -

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥'

उपसर्गाणां व्यवहारविषये शाकटायन आह -

'धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते ।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा ॥'

कश्चिदुपसर्गः प्रतीतमपि धात्वर्थं तिरयति विपर्यासयति वा । यथा-गच्छति-आगच्छति । कश्चिन्निर्दिष्टमेवार्थमनुविधत्ते तदनुगुणं वार्थमुपस्थापयति । यथा-नमति-आनमति; वसति-अधिवसति । कश्चिच्च तत्रार्थे विशेषमुपजनयति । यथा-भवति-प्रभवति, उद्भवतीत्यादयः ।

केचनाकर्मका धातव उपसर्गयोगेन सकर्मका भवन्ति । यथा-वृतु वर्तनेऽकर्मकः । निःपूर्वकस्तु नियमेन सकर्मकः । 'ष्ठा'गतिनिवृत्तौ नियमेनाकर्मकः । सोपसर्गस्त्वर्थानुरोधात् सकर्मकः । यथा-मधु मधुकृतो निस्तिष्ठन्तीति । वैपरीत्येन सकर्मका अप्युपसर्गयोगेनाकर्मका भवन्ति केचन धातवः । यथा-श्रयति सकर्मकः प्रायेण । सम्पूर्वकस्तु संगतावकर्मकतां याति । यथा-चूतेन संश्रितवती नवमालिकेयमिंति कालिदासप्रयोगः ।

केचिदुपसर्गाः कृत्प्रत्यये यमर्थं ब्रूवन्ति न तं तिङ्प्रत्यये । यथा-आहारो भोज्यार्थे प्रयुक्तेऽपि 'आहरति' इति कदापि तदर्थे न प्रयुज्यते ।



उपसर्गाणां संख्याविषयेऽपि मतपार्थक्यमुपलभ्यत आचार्येषु । तदस्ति सुपद्मव्याकरणे त्रोटकच्छन्दसा रचितः प्रसिद्धोऽयं श्लोकः -

"प्रपरापसमन्ववनिर्दुरभि-/व्यधिसूदतिनिप्रतिपर्यपयः ।
उपआङिति विंशतिरेष सखे/उपसर्गविधिः कथितः कविना ॥"

पाणिनीयसम्प्रदाये तु निरयते-दुरयते, निलयते-दुलयते इत्यादीनां सिद्ध्यर्थं निरः निसः दुरः दुसश्च पार्थक्यस्वीकरणादुपसर्गाणां संख्या द्वाविंशतिरिति । अष्टाध्याय्या 'उपसर्गाः क्रियायोगे' (१.४.५९) इत्यस्य भाष्यादिष्वेतच्छर्वं स्पष्टमस्ति ।

निपातविषये पाणिनेः 'प्राग्रीश्वरान्निपाताः' (१.४.५६), इत्यतः 'अधिरीश्वरे' (१.४.९७) इत्यन्तं यावत् सूत्राणि सन्ति । तेषु 'चादयोऽसत्त्वे' (१.४.५७), 'प्रादयः' (१.४.५८) इत्येवंरूपे सूत्रद्वये प्रादिगणे २२ शब्दानां संग्रहोऽस्ति, येषामुपसर्गसंज्ञापि भवितुं शक्यते । चादिगणे तु २०७ संख्यकानां शब्दानां संग्रहोऽस्ति । अद्रव्यार्था लिङ्गसंख्यादेरन्वयरहिताः चादयोऽद्रव्यार्थाः प्रादयश्च निपातसंज्ञकाः । व्यापारानुसारेण प्रादय उपसर्गाः क्रियासु द्रव्येषु च पारस्परिकान् भेदान् सूचयन्ति । क्रियागतो भेदो यथा-पचति पठति च । द्रव्यगतो भेदो यथा-देवदत्तो यज्ञदत्तश्च । समुच्चयाद्यर्थका एते । प्रयोगनियमानुसारेण चादयो निपाताः समुच्चयनीयानां पदार्थानामनन्तरं प्रयुज्यन्ते । एतेषां निपातोपसर्गाणां वाचकत्व-द्योतकत्व-विषयः सूक्ष्मेक्षिकया विवेचितः महिमभट्टेन । तस्य सिद्धान्तस्य पर्यालोचनात्प्राग् व्याकरण-दर्शनादिषूपलब्धानामेतद्विषयकानां सिद्धान्तानामुपस्थापनमनावश्यकं न भवतीति मन्ये ।

उपसर्गाणामर्थविषये व्याकरणदर्शनेषु गहनातिगहनो विचारः समुपलभ्यते । वैयाकरणानां निकाये उपसर्गा द्योतका, उपसर्गा वाचकाश्चेति द्वावेव वादौ गृहीतौ । उपसर्गाणां स्वरूपं प्रदर्शयितुं भर्तृहरिराह-

"क्वचित् सम्भविनो भेदाः केवलैरनिदर्शिताः ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना ॥"

(वाक्यपदीयम् २।१८७)।

अस्यार्थः केवलेन धातुनाभिहितं क्रियासामान्यरूपमसत्त्वभूतं भावमेव विशिनष्ट्युपसर्गः। क्रियागतं प्रकर्षादिरूपं विशेषमवद्योतयन् स धात्वभिहितं क्रियासामान्यं व्यवर्त्तयति । तर्हि किमुपसर्गाणां द्योतकत्वमाहोस्विद् वाचकत्वमित्याशङ्क्य भर्त्तृहरिः मध्यमार्गमनुसरन् उभयपक्ष एव सहमतिं प्रकटितवान् ।

"स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा ।
शक्तयाधानाय धातोर्वा सहकारी प्रयुज्यते ॥"

(वाक्यपदीयम् २/१८८)

न केवलं द्योतका एवोपसर्गा, यतो वाचका अपि ते दृश्यन्ते लोकव्यवहारे । स्थाधातोर्गतिनिवृत्तिवाचकत्वं 'तिष्ठती'त्यादावनुभूयते, 'प्रतिष्ठते'इत्यादौ तु प्रेत्यादिनोपसर्गेण गतिवाचकत्वं तस्यैव धातोर्व्यवस्थाप्यत इति ।

केचिद्वैयाकरणा आहुः-उपसर्गाः स्वतन्त्रतया न प्रयुज्यन्ते । सर्वदा धातुयुक्तस्यैवोपसर्गस्य प्रयोगात्तस्य स्वकीयः कोऽप्यर्थो नास्तीति । तेन यदि स सर्वदा धातुना सह एव प्रयुज्यते तर्हि इयमर्थनिरूपिका शक्तिः कस्य ? तत्र पक्षत्रयं सम्भवति । यथा-'अनुभूयते सुखमि'त्तत्रानुपदस्यानुभवरूपोऽर्थः १) 'अनु'-इत्यस्योपसर्गस्य, २ 'भू'-इत्यस्य धातोः, ३ धातूपसर्गयोरुभयोर्वा । परं यदि १) अनुभवरूपोऽर्थोऽन्वितस्युपसर्गस्य स्यात्तर्हि अनुगच्छतीत्यादिष्वपि तस्यार्थस्य प्रसङ्गो दुर्वारो भवेत् । यदि पुनरेषोऽर्थ उपसर्गस्यैव स्यात्तर्हि धातुरूपायाः प्रकृतेरर्थाभावादत्राख्यातेन प्रत्ययार्थस्यान्वयो न भवेत् । प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वमिति व्युत्पत्तिविरोधात् । २) यद्यनुभवरूपोऽर्थो भूधातोः स्यात् तर्ह्यनोरभावे केवलस्य भूधातोः प्रयोगेऽप्यनुभवरूपस्यार्थस्य प्रतीतिः स्यात् । परं न भवत्येवम् । ३) अर्थोऽयं समुदायस्यापि न भवेत्,-धातुगणे पाणिनिना विशुद्धानामेव धातूनां पाठादिति । तेन अडादिव्यवस्थाप्यनुपपन्ना स्यात् । धातोरेवार्थविशेषं द्योतयन्त्युपसर्गाः तेनैवार्थवन्तो भवन्तीति शाकटायनाचार्यस्य मतम् । परं मतमिदमनेकार्थेष्वेव धातुषूपपद्यते । किन्तु धातुपाठे धातूनामेकैकोऽर्थो निर्देशितः । तर्हि कथं धातूनामनेकार्थता ? अस्योत्तरं भवति-धातूनामनेकार्थता



प्रयोगादनुसर्त्तव्या । धातुपाठेऽर्थनिर्देशो निदर्शनाय कृतो न परिगणनाय । निर्दिष्टेभ्योऽर्थेभ्यो व्यतिरिक्ता अपि धात्वर्था भवन्ति । तेन तेन धातुनासहोच्चारिता उपसर्गाः तेषु तेषु धातुष्वन्तर्भुक्तान् तांस्तानर्थानुद्भावयन्ति । अनेकार्थेषु धातुष्वेकस्य कस्यचिदर्थस्य तात्पर्यग्राहकत्वमेव द्योतकत्वमिति । अन्ये त्वाहुर्द्योतकत्वं नाम १) स्वसमभिव्याहृत-पदनिष्ठ-वृत्युद्बोधकत्वम् । कदाचित् २) क्रियाविशेषस्याक्षेपकत्वं वा । यथा-'प्रादेशं विलिखती'त्यत्र 'वि' इत्युपसर्गो मानक्रियाया आक्षेपकः सन् 'विमाय लिखति' इत्येवंरूपमर्थं प्रददाति । क्वचित्तु ३) सम्बन्धपरिच्छेदकत्वमपि द्योतकत्वम् । यथा-'जपमनु प्रावर्षदि'त्यत्र कर्मप्रवचनीये लक्ष्यलक्षणभावसम्बन्धप्रतीतिः । एष्वेवार्थेषु वैयाकरणा अनुभवादेर्धात्वर्थत्वमुपसर्गाणां द्योतकत्वञ्च स्वीकुर्वन्ति ।

अपरे वदन्ति धातूपसर्गयोर्नैकविधः सम्बन्धः । क्वचिद्विशेषण-विशेष्यभावः, क्वचिद्बाध्यबाधकभाव इत्यादयः । केवलस्योपसर्गस्य स्वातन्त्र्येण वाक्ये प्रयोगो न भवतीति तावता न तस्य वाचकता विहन्यते । यथा प्रत्ययस्य कर्मादिकारकाणां संख्याकालादीनाञ्च वाचकत्वमस्ति किन्तु तस्य पृथक् प्रयोगो न भवति, तथैव उपसर्गा धातुभिरसंयुक्ताः तेषामर्थानां प्रत्यायका मा भवन्तु । किन्तु धातोः प्राक् प्रयुक्तास्ते भवन्तीत्यत्र नास्ति कापि क्षतिरिति । पुनः प्रसिद्धिरस्ति 'धात्वर्थं बाधते कश्चिदिति ।' बाधो नाम धातोरन्तर्निहितस्यार्थस्योद्भावनम् । यद्युपसर्गाणां स्वकः कश्चिदर्थो न स्यात्तर्हि केन सामर्थ्येन ते प्रसिद्ध्यन्तं धात्वर्थं बाधेरन् । अत उपसर्गा वाचकाः । किन्तु समग्रे व्याकरणनिकाये दर्शनस्यास्य समर्थका न बहवः । प्रायः सर्वे उपसर्गाणां द्योतकत्वमेव स्वीकुर्वन्ति ।

नैयायिकाः चादीनां निपातानां वाचकत्वं प्रादीनामुपसर्गाणां द्योतकत्वञ्च स्वीकुर्वन्ति । शब्दशक्तिप्रकाशिकायां निपातं लक्षयन् जगदीश आह-

'स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयक्षमः ।
सुवाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः ॥'

(सार्थकशब्दप्रकरणम्, ११)।

तन्मते 'प्रादयस्तूपसर्गा न सार्थकाः, सार्थकाश्चेन्निपाता अपि ।' कोशादिषूपसर्गार्थानां स्वतन्त्ररूपेणानिर्देशात्, निपातानान्तु निर्देशादपि नैयायिका

उपसर्गाणां द्योतकत्वं निपातानां वाचकत्वञ्च ब्रुवन्ति । 'साक्षात्क्रियते गुरु:' इत्यादिषु प्रयोगेषु कर्मार्थे लकारो न सङ्गच्छते । सकर्मक एव धातौ कर्मलकारस्य प्रसङ्गत्वात् । कृधातो: सकर्मकत्वेपि साक्षात्कारार्थे सकर्मकत्वं न सम्भवति । यत: स्वार्थ-फल-व्यधिकरण-व्यापार-वाचकत्वमेव सकर्मत्वम् । साक्षात्काररूपोऽर्थो नात्र धातो:, किन्तु निपातस्यैव । तस्मादुच्यते, "सकर्मकत्वञ्च स्वस्वसमभिव्याहृतनिपातान्यतरार्थ-फलव्यधिकरण-व्यापार-वाचकत्वं । कर्मत्वञ्च स्वस्वसमभिव्याहृतनिपातान्यतरार्थ-फलशालित्वम्" (परमलघुमञ्जूषा पृ० १४५)।

लक्षणस्यास्य खण्डनप्रसङ्गे वैयाकरणा आहु:-साक्षात्काररूपं फलमत्र निपातस्यार्थ: । कृतिर्व्यापारो वा कृधातोरर्थ:। फलस्यानुकूलत्वरूपे भेदसम्बन्धे व्यापारेऽत्रान्वयो भवति । तर्ह्यत्र ' साक्षात्कारानुकूलो व्यापार' इत्येवंरूपो बोधोऽसम्भव एव - यतो नामार्थ-धात्वर्थयोर्भेदसम्बन्धे साक्षादन्वयो न सम्भवति । नोचेत् 'तण्डुल: पचति' इत्यादिषु तण्डुलस्य कर्मत्वरूपेण धात्वर्थेऽन्वयो भवेत् । यतस्तत्र संसर्गमर्यादया कर्मत्वप्रतीति: स्यात् । धात्वर्थव्यापारप्रयोज्यफलाश्रयत्वे एव कर्मत्वेऽत्र कर्मत्वोपपत्तिरपि न । यत: प्रस्तुते स्थले साक्षात्काररूपोऽर्थो निपातस्यैव, न धातो: । कर्मत्वमेवंरूपे न स्वीकृते 'प्रयागात् काशीं गच्छति' इत्यादिष्वपि प्रयागस्य कर्मत्वप्रसङ्गो दुर्वार: स्यात् । यतस्तत्रोत्तरदेश-संयोगानुकूलव्यापारप्रयोज्य-विभागरूपस्य फलस्याश्रय: प्रयाग: । तस्मात्फलाश्रयत्वमेव धात्वर्थत्वम् । अत: साक्षात्काररूपस्यार्थस्य निपातार्थतास्वीकारे धात्वर्थत्वाभावात्तस्य कर्मत्वं नोपपद्यते । किन्तु निपातस्य द्योतकतास्वीकारे नेयं समस्या । साक्षात्कारादिरूपाणामर्थानां धातुत्वे प्रतिपाद्ये तस्याश्रयस्य कर्मत्वसिद्धि: सुलभा भवेत् । अत: निपाता अपि द्योतका: ।

वैयाकरणभूषणसारानुसारेण निपातानां वाचकत्वे स्वीकृते 'शोभन: समुच्चय:' इत्यर्थे 'शोभन: च' इति, 'घटस्य समुच्चय:' इत्यर्थे 'घटस्य च' इत्यादय: प्रयोगा अपि यथावत् भविष्यन्ति । परं तन्न समीचीनम् । यद्यप्यन्येषां मतानुसारेण नैतद्दोषाय । यत: शब्दशक्तिस्वभावान्निपातप्रतीतोऽर्थ: सर्वदा विशेषणरूपेणैव प्रतीयते । अत्र चेत्यस्य निपातस्यार्थ: शोभनपदार्थस्य



विशेषणत्वेन नान्वेति । एवं घटपदार्थस्यान्वयोऽपि चार्थे न । निपातार्थस्य विशेषणत्वे तत्रान्यविशेषणस्यान्वयासम्भवात् । सम्बन्ध एव षष्ठीविधानाच्च घटादौ न षष्ठीप्रसक्तिरपि ।

एवं नैयायिका निपातानां वाचकत्वमुपसर्गाणां द्योतकत्वञ्च वैयाकरणास्तु मुख्यतया द्वयोरेव द्योतकत्वं स्वीकुर्वन्ति । महिमभट्टस्तु उपसर्गाणामपि द्योतकत्वं सर्वथा निराक्रियते । अन्वय-व्यतिरेकयुक्तया उभयोरेव वाचकत्वं प्रमाणयति स: । तन्मते उपसर्गा अपि न द्योतका:, किन्तु वाचकास्ते ।

महिमा आह-शब्द: खलु वाच्यार्थं यावत् निर्दिष्ट: । प्रतीयमानार्थप्रतीतौ वाच्यार्थस्यानिवार्य्यतास्ति । अर्थादर्थान्तरानुमितिर्भवति । अतोऽर्थान्तरप्रतीतौ वाच्यार्थमत्यावश्यकम् । अत्र व्यञ्जनावादिन: वक्तुं शक्नुवन्ति यदि प्रतीयमानार्थं प्रति वाच्यार्थस्यानिवार्य्यता स्यात्तर्हि 'प्राप्तमि'त्यादिषु प्रयोगेषु प्रादीनामुपसर्गाणामपि वाचकत्वं स्वीकर्तव्यम् । ते न द्योतका वाच्यादनन्तरमेव द्योत्यस्य स्थिते: । वाचकत्वे हि हलादित्वाद् धातोर्यङादिप्रसङ्ग: स्यात् । प्रादीनां वाचकत्वे स्वीकृते त्वाप्तवत् प्रादयोऽपि क्रियावाचका: स्यु: । तेन प्राप्धातो: यङादिप्राप्तिरपि स्यात् ।

यङ्विधायकेन 'धातोरेकाचो हलादे: क्रियासमभिहारे यङ्' (३.१.१२) इत्यनेन पाणिनिसूत्रेण व्यञ्जनवर्णादिरेकस्वरवर्णनिष्पन्नाद् धातो: पर: पौन:पुन्यार्थेऽतिशयार्थे च यङ्प्रत्ययो वा स्यात् । प्रस्तुते स्थले आप्ध ातोरजादित्वे यङोऽप्रसङ्गेऽपि प्राप्ते: हलादित्वात् यङ्प्रसङ्गो दुर्वार: स्यात् । प्राप्तेति शब्दे प्रेत्यस्य स्वतन्त्ररूपेणावाचकत्वे च तस्याधातुत्वाद् वाचकत्वे तु तस्यापि क्रियापदत्वाद् धातुरिह नाकारादि: किन्तु पकारादिरेव । तदा प्राप: हलादित्वाद् धातुत्वाच्च व्याकरणविरुद्धो यङ्प्रसङ्ग: स्यात् । तस्मात् प्रादीनां द्योतकत्वस्वीकरणमेव वरं, न वाचकत्वम् । द्योतकत्वे तु क्रियापदस्याङ्गरूपेण स्वतन्त्रत्वाद् 'आप्'-इत्यस्यैव क्रियापदत्वेऽत्र यङ्प्राप्तिर्न । "ननु यदि शब्दस्यार्थनिरपेक्षस्य व्यञ्जकत्वं नेष्यते, तत्कथं प्राप्तमित्यादौ प्रादीनां द्योतकत्वमुक्तं, न वाचकत्वम् । वाचकत्वे हि लादित्वाद् धातोर्यङादिप्रसङ्ग: स्यात् ।.........उक्तमुपचारतो न परमार्थ इति तस्य

प्रदीपादिनिष्ठस्य वास्तवस्य शब्दार्थविषयत्वस्य प्रतिक्षेपात्" (व्यक्तिविवेक:, प्रथमो विमर्श:, पृ० १५०)।

उपसर्गा असत्त्वभूता: । असत्त्वभूत्वं नाम असिद्धस्वभावत्वम् । स्वरूपासिद्धिर्ह्युपसर्गस्यासत्त्वभूतता । धात्वर्थं प्रकटयन्त्युपसर्गा: । यथा प्रस्तुते प्रसङ्गे आप्तेति सामान्या क्रिया । तस्या: प्रकर्षद्योतनार्थं प्रेत्यस्योपसर्गस्योपक्रम: । प्राप्तादिषु स्थलेष्वाप्तादेरपेक्षया या क्रियाप्रकर्षप्रतीति: साप्तादिसामान्यक्रियाया धर्मविशेष:। आप्तादिक्रियासामान्येनैवात्र प्रकर्षताप्रतीति: । यतो नियमानुसारेण सामान्यं कदापि विशेषविहीनं न भवति । शशविषाणस्य सत्तावत् विशेषविहीनस्य सामान्यस्य सत्ताऽपि निराधारा । अत: सामान्यतयाप्तादौ क्रियायामपि प्राप्तगता प्रकर्षताऽन्तर्भुक्ता एव । तस्मात् सामान्यप्रतीत्या विशेषप्रतीतिरपि नित्यसिद्धा । अत: प्रादय: केवला विशेषद्योतका: । एवं विशेषद्योतनव्यापारावधिगामित्वात् प्रादीनामुपसर्गाणां प्रकर्षतादिविशेषद्योतकत्वसमर्थनमेव ज्यायान् । न वाचकत्वसमर्थनम् । "अथोच्यते-पचत्यादय: क्रियासामान्यवचना: । सामान्यानि चाशेषविशेषान्तर्भावभाञ्जि भवन्तीति तत् प्रतीतिनान्तरीयकतयैव विशेषसद्भाव: सिद्ध एव । यदाहु:, 'निर्विशेषं न सामान्यं भवेच्छशविषाणवद्' इति केवलमर्थसामर्थ्यसिद्धोऽपि विशेषो द्योतनमपेक्षत इति तन्मात्रव्यापारा: प्रादयो द्योतका एव भवितुमर्हन्ति न वाचका इति" (व्यक्तिविवेक:, प्रथमो विमर्श:, पृ० १५१)।

यथा वृक्ष इति कश्चित् सामान्यवाचक: शब्द: । आम्र-पनस-वट-शाल्मलादय: विशेषा: वृक्षा: सामान्ये वृक्षे एवान्तर्भुक्ता:। यदि विशिष्टा: सर्वे वृक्षा दूरीकृता: तर्हि सामान्यरूपेण वृक्षोऽपि न स्यात् । अतो विशेषरहितं सामान्यमाकाशकुसुमवदवास्तवम् । इत्थं सामान्येनाभिधानेनैव विशेषस्यापि कथनं भवति । परं तस्य विशेषस्य स्पष्टप्रतिपत्त्यर्थं पृथक्त्वेनाभिधानमावश्यकम् । प्रकृतस्थलेऽपि आपादिना क्रियासामान्येन प्रतीतेऽर्थे प्रादय उपसर्गा: प्रकर्षतादेर्विशेषाणां द्योतनं कुर्वन्ति । अत उपसर्गा द्योतका, न वाचका: ।

महिमभट्टस्यायमाशयोऽत्र यद् विशेषस्य सामान्यान्तर्भुक्ते सति प्रतीतावापि केवलक्रियापदेन विशेषप्रतीतिर्न भवति । सामान्यक्रियया प्रतीतायां



सामान्यक्रियायां विशेषक्रियाया अवस्थाने तस्या: प्रतीतिरपि सामान्यतयैव स्यात् । न विशेषतया । यावद् विशेषताधायकानां प्रादीनां प्रयोगो न, तावद् विशेषतया प्रतीतिरपि न भवेत् । तस्मादीदृश्यां प्रतीत्यां प्रादीनां जनकत्वमेव स्वीकर्त्तव्यम् । अत: प्रादय: प्रकर्षादीनां वाचका: ।

पुन: सामान्ये विशेषाणामन्तर्भावेऽपि तेन व्यवहारसिद्धिर्न शक्यसम्पादा । व्यवहारसिद्धिस्तु सर्वदा निश्चितविशेषज्ञाननिबन्धना । वृक्षपदे ह्याम्रपनसादीनां सर्वेषां वृक्षाणां समावेशेऽपि आम्रवृक्षप्रतीतावाम्रपदस्य प्रयोगोऽवश्यम्भावी । एवं विशेषप्रतीतिर्न पूर्वसिद्धा, किन्तु जन्या एव । "किन्तु यदप्रतीतौ सामान्यप्रतीतिरेव न पर्यवस्यति तद्विशेषमात्रं तेभ्य: प्रतीयतां नाम । न तु तावता व्यवहारसिद्धि: काचित् । तस्या: प्रतिनियतविशेषावसायनिबन्धनत्वात् । स त्वपूर्वतया प्रादिभ्य एवोद्भवन्नवधार्यते । न पचत्यादिभ्य: । नार्थादपि तत्सद्भावसिद्धि: काचित् । अस्या: प्रतिनियतविशेषावसायनिबन्धनत्वात् ।" (व्यक्तिविवेक:, प्रथमो विमर्श:, पृ० १५१)। एवं यत: प्रादिद्योत्यो विशेष: सामान्ये क्रियापदे सामान्यतया तिष्ठन्नपि विशेषतया तस्यावगति: प्रादीनां प्रयोगेनैव भवति तत: प्रादय उपसर्गा न विशेषस्य द्योतक:, किन्तु वाचका एव ।

'तत्सत्त्वे तत्सत्त्वमन्वय:, तदभावे तदभावो व्यतिरेक: 'इत्यनेन यस्य शब्दस्य प्रयोगे यस्यार्थस्य प्रतीतिर्यस्य शब्दस्याप्रयोगे यस्यार्थस्याप्रतीतिश्च तस्याधारेणान्वयव्यतिरेकेणैव शब्दस्य वाच्यवाचकभावत्वं निरूपयितव्यम् । यथा घटरूपेणार्थेन घटशब्दस्य वाच्यवाचकभावरूप: सम्बन्ध: । "तस्माद् यत्प्रयोगान्वयव्यतिरेकानुविधायिनी यस्य प्रतीतिस्तयोर्वाच्यवाचकभावव्यवहारविषयत्वमेवोपगन्तुं युक्तं नाभिव्यक्तिविषयत्वम् । यथा घटशब्दतदर्थयो:" (व्यक्तिविवेक:, प्रथमो विमर्श:, पृ० १५२)।

तथा प्रादिद्योत्यस्य प्रकर्षस्य प्रतीतिरप्यन्वयव्यतिरेकेणैव जायते । अतो यदि प्रादीनां प्रयोगे प्रकर्षप्रतीति:, प्रयोगाभावे तु केवलस्य प्रकर्षरहितस्य सामान्यस्य प्रतीति: स्यात् तर्हि तेषां वाच्यवाचकत्वमनस्वीकार्यत्वात् प्रादीनां द्योतकत्वस्वीकरणं न समीचीनं स्यात् । तदुट्टङ्कयति महिमा, "प्रादिप्रयोगानुविधायिनी तत्र पचतीत्यादौ प्रकर्षादिप्रतीतिरीति तेऽपि तथा भवितुमर्हन्त्येव ।"

(व्यक्तिविवेक:, प्रथमो विमर्श:, पृ० १५२)। अन्यथा प्रादीनां द्योतकत्वे स्वीकृते नीलोत्पलादिषु स्थलेषु नीलरूपस्य विशेषणस्यापि द्योतकत्वं भवेत्। यतोऽत्रापि सामान्यरूपे उत्पलशब्दे रक्तनीलादीनां सर्वेषां विशेषणानामप्यन्तर्भावोऽस्ति । उत्पलसामान्ये यदि नीलरूपस्य विशेषणस्याप्यन्तर्भाव: स्यात्तर्हि नीलशब्दोऽप्यत्र द्योतक एव भवति, न वाचक: । तदा विशेष्यविशेषणभावरूपो व्यवहार एवानुपपन्नो भवेत् । किन्तु नीलादीनां द्योतकत्वं कुत्रापि न स्वीक्रियते । ते वाचका एव । पुनरन्वयव्यतिरेकेण तस्यापि वाचकत्वं सिद्ध्यति । नीलशब्दस्य प्रयोगे नीलगुणरूपस्यार्थस्य प्रतीति:, नीलशब्दस्याप्रयोगे तु नीलगुणरूपस्यार्थस्याप्रतीति: । अतो यया युक्त्या नीलादीनां वाचकत्वं स्वीक्रियते तयैव युक्त्या प्रादीनां वाचकत्वमपि स्वीकर्त्तव्यं, न द्योतकत्वम् । पुन: यतो व्यवह्रियमाणस्य शब्दमात्रस्यार्थ: मनस्येव विद्यते अतोऽर्थरूपेण शब्दमात्रस्यान्त: सत्ता नित्यसिद्धा । तर्हि पदमात्रस्य द्योतकता दुर्वारा स्यात् । यदि कस्यापि पदस्य वाचकत्वं न भवेत् तदा वाच्यवाचकभावेन व्यवहारोऽप्युच्छिन्न: स्यात् । तस्मान्महिमभट्टेन प्रादीनां द्योतकत्वमौपचारिकरूपेण स्वीकृतं, न मुख्यरूपेण । वाच्यार्थस्य स्पष्टप्रतीतिर्ह्युपचारस्य प्रयोजनम् । निमित्तन्तु विशेष्यविशेषणयोर्झटित्यवगतिरनुपलक्षितक्रमत्वात् सहभावप्रतीतिश्च ।

विशेषणं द्विधा-अन्तरङ्गं बहिरङ्गञ्च । यद् विशेषणं विशेष्ये संलग्ने सति विशिष्टतां जनयति तदन्तरङ्गं विशेषणम् । यथा स्फटिकादे: समीपे हि लाक्षादि: स्फटिकादौ स्वप्रतिबिम्बं संक्रामति, न दूरात्, तथा निपातोपसर्गा अपि विशेष्येण संयुक्ता एव विशेषतामानयन्ति; यद्यपि प्रयोगविधायामेतयो: पार्थक्यमस्ति । उपसर्गा धातो, निपातास्तु नामाख्यातयो: परं प्रयुज्यन्ते । निपातोपसर्गभिन्नं विशेषणन्तु सर्वत्र प्रयुज्यते ।

यद् विशेषणं व्यवहितेऽव्यवहिते वा विशिष्टतां जनयति तद् बहिरङ्गं विशेषणम् । यथा चुम्बको लौहं निकषा दूरं वा स्वशक्तिं संक्रामयति । भेदद्वयस्यास्य पुन: समानाधिकरणभिन्नाधिकरणभेदेन द्वैविध्यमुपलभ्यते ।



धात्वर्थ-नामार्थभेदेन विशेष्यो द्विविध: । पचत्यादय: क्रियावाचका: धात्वर्था: । जातिगुणद्रव्यरूपा रामादय: संज्ञावाचका नामार्था: । गोप्रभृतिषु गोत्वादिवदन्तरङ्गविशेषणं विशेष्येऽन्तर्भवति । झटित्यवगमादेतयो: क्रमप्रतीतिर्न । तस्मादेव कारणादन्तरङ्गविशेषणेन विशेष्यस्य सहभावप्रतीतिश्च । तस्माद्द्योत्यद्योतकभ्रमो जायते । वस्तुतस्त्वत्र क्रमोऽस्ति; सहभावो नास्ति । अस्ति सहभावस्य भ्रमो, यस्तु द्योत्यद्योतकभावस्याधार: । अनया युक्त्या केन केनाप्याचार्य्येण धातावुपसर्गस्यान्तर्भाव: स्वीकृत: । उच्यते च-

'अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयो: शास्त्रे धातुरेव च तादृश: ॥'

(वाक्यपदीयम् २।१८०)।

उपसर्गश्च धातुश्चेति द्वयमेव सम्भूय धातु: । धातुना क्रोडीकृत उपसर्गस्तदवयव एवेति परमार्थ: । अड्द्विर्वचनव्यवस्थार्थं केवलं धातव: पृथगुपदिष्टा, वस्तुत: पुनर्विशिष्टक्रियावचना एव त इति सोपसर्गाणामेव धातुत्वम् । अत्रेदमवधार्यम्-'लुङ्-लङ्-लृङ्क्ष्वडुदात्त:' (६.४.७१) इत्यनेन 'आडजादीनाम्' (६.४.७२) इत्यनेन च सूत्रद्वयेन लुङ्-लङ्-लृङ्-विभक्तिषु व्यञ्जनवर्णादिधातो: पूर्व उदात्तोऽकारो भवति स्वरवर्णादिधातोस्त्वाडागमो भवति । यथा-कृ अकार्षीत्, अकरोत्, अकरिष्यत् । इष (लुङ्) ऐषीत्, (लङ्) ऐच्छत् । आटश्च सूत्रेण वृद्धि:। अडागमस्तु सर्वदा उपसर्गात् परं धातो: पूर्वं च भवति । 'अव + आपत्' इत्यादिष्वडागम: 'अव-उपसर्गात् परे 'आपत्' इत्यस्य पूर्वे सति 'अवापत्' इत्यस्य सिद्धि: स्यात् । इत्थमडादिसिद्ध्यर्थमेवानेकैराचार्यैर्धातूपसर्गयोर्भिन्नत्वं कल्पितम् । अन्यथार्थदृष्ट्या तु धातूपसर्गयोरेकत्वमेवास्ति । तदुक्तं भर्तृहरिणा -

"तथाहि संग्रामयते: स्वोपसर्गाद्विधि: स्मृत: ।
क्रियाविशेषा: संघातै: प्रक्रम्यन्ते तथाविधा: ॥"

(वाक्यपदीयम्, २.१८१)।

'संग्राम्' इति धातु: । संग्रामयति, संग्रामयामास इत्यादीनि रूपाणि । अस्मिन् धातौ 'सम्' उपसर्ग: । तस्य पूर्वमडागम: स्यात् । यथा-असंग्रामयत् । अत उपसर्ग: क्रियाया अवयव एव । तस्मादन्तरङ्गं विशेषणं विशेष्येऽन्तर्भुक्ते

इव विद्यमानेऽपि तस्य स्वतन्त्रोऽर्थो भवति । अतः स्वीकर्त्तव्यमेतदत्र यद् द्योत्यद्योतकभावो हि भ्रमः । वस्तुतस्त्वत्र वाच्यवाचकरूपः सम्बन्ध एवास्ति ।

लाक्षादिना सह स्फटिकस्याव्यवधानवद् विशेष्येन सह चादीनां विशेषणानामव्यवधानं भवति । लाक्षादेः प्रतिकृतिर्यथा स्फटिकादौ संक्रान्ता भवति, तथा चादिविशेषणानि येषां येषां विशेष्याणां परं प्रयुज्यन्ते तेषु तेषु विशेष्येषु स्वकीयानि वैशिष्ट्यान्यारोपयन्ति । अतोऽनुचितेषु स्थलेषु चादीनां प्रयोगं न कर्त्तव्यम् अनुचिते स्थले प्रयुक्ते सति चादयोऽनभीष्टेऽर्थान्तरे विशेषतामादधति । प्रस्तुतार्थस्य सङ्गतिरपि न भवति । यदि वा येन तेनोपायेनार्थसङ्गतिर्भवेत् तर्हि प्रस्तुतार्थबोधे रसास्वादे च विघ्नः स्यात् । शब्ददोषस्यापि प्रसक्तिर्भवेत् । "इह खलु द्विविधमनौचित्यमुक्तमर्थविषयं शब्दविषयञ्चेति ।" (व्यक्तिविवेकः, २यो विमर्शः, पृ० . १७१)। अतश्चादेः तत्त्वं यथायथमनुसर्त्तव्यम् । तदुक्तं महिम्ना – "निपातोपसर्गादीनामसत्त्व-भूतार्थानामुपाधिरूपत्वादुपाधिमत्समाश्रयेणैवार्थावगतिरिति पदवाक्ययोरर्थावगम-कत्वोक्त्यैव तेषामपि गमकता प्रतिपादिता । केचित्पुनर्निपाताः क्रोधाद्भूतशोकादीन् भावान् प्रदीपवद् वक्तृगतानेवावद्योतयन्ति न वाच्यगतान् । यथा–'आस्तिष्ठ रक्षः । क्व मे प्रियतमामादाय गच्छसीति' क्रोधः । 'अहो बतासि स्पृहणीयवीर्य' इति विस्मयः । 'हा धिक् कष्टमहो क्व यामि शरणम्' इति शोकः । अत एव तेषां द्वित्राणां त्रिचतुराणां वा प्रयोगे पुनरुक्तता नाशङ्कनीया समुदितानां प्रदीपादीनामिव स्वकार्ये प्रकर्षदर्शनात् । तदुक्तम्–

'नामवदुपसर्गास्ते किन्त्वन्योपहितमाहुरर्थं स्वम् ।
दीपकवत्तु निपाताः शोकादीन् द्योतयन्ति वक्तृगतान् ॥
गमयन्ति कार्यभूतान् गद्गदिकादिवदवाचका एव ।
सङ्घटनावर्णाद्याः क्रोधोत्साहादिकान् भावान् ॥' इति।"

(व्यक्तिविवेकः, तृतीयो विमर्शः, पृ० . ५१०)।

आधुनिकभाषाविज्ञानानुसारेणापि प्रकृतिः प्रत्ययश्च पृथगर्थे स्वतन्त्ररूपेण व्यवह्रियेते । वैदिकवाङ्मये क्रियापदात् पृथग्रूपेणोपसर्गस्य प्रयोगः सुप्रसिद्ध एव । लौकिकसंस्कृते धातुना संयुक्तरूपेण प्रयुक्तेऽप्युपसर्गस्य



स्वार्थकत्वं स्वशक्तित्वञ्च नूनं स्वीकर्त्तव्यम् । न्यायदर्शनादौ यथा पचति-पदे पच्धातोः विक्लृत्त्यनुकूलं व्यापाररूपमर्थं, 'ति'प्रत्ययस्याप्याश्रयत्वं वर्त्तमानकालरूपमर्थञ्च स्वीकृत्य तत उभयोरन्वयः सम्भावयति, तथोपसर्गे क्रियायाञ्चापि पृथग्वाचकत्वं स्वीकृत्यार्थावबोधे उभयोः स्वातन्त्र्यमनुमत्य च मिलितार्थो भवति । नागेशानुसारेण प्रथमं तावत् धातूपसर्गयोः सम्बन्धो बुद्धिग्राह्यो भवति । बाह्यप्रयोगदृष्ट्या तु प्रथमं साधनप्रयुक्तः तिवादि प्रत्यययोगः । तस्मात् साध्यज्ञानेन क्रियावाचकत्वे सिद्धे सत्युपसर्गयोगो भवति । विशिष्टार्थस्याप्रसिद्धत्वे उपसर्गयोगेन विना श्रोतुः प्रतीतिरपि न स्यात् । तस्मादुपसर्गयोगः ।

निष्कर्षतः व्याकरणदर्शनादिष्वनेकैर्विद्वद्भिर्निपातोपसर्गाणां द्योतकत्ववाचकत्वं लक्षीकृत्य प्रज्ञाऋद्धा अनर्घ्या निष्कर्षाः प्रणीताः; किन्तु येनान्वयव्यतिरेकविधानेन महिम्ना निपातोपसर्गाणां वाचकत्वं प्रमाणितं तदस्वीकारे वाच्यवाचकभावव्यवस्थापनमेवाखिलमुच्छिन्नं स्यात् । अतो निपातोपसर्गाणां वाचकत्वं सर्वत्राक्षुण्णमिति विदाङ्कुर्वन्तु विद्वांसः ।

**<u>सहायकग्रन्थसूची</u>**


१) निरुक्तम्, (श्रीयास्काचार्यविरचितम्) सं० आचार्य विश्वेश्वर सिद्धान्तशिरोमणि (१९६६)
२) पाणिनिः (प्रभाख्यटीकासमेतः), सं०, देवेन्द्रकुमार विद्यारत्न (१३१८)
३) वाक्यपदीयम् (भर्तृहरिप्रणीतम्), सं० रघुनाथशर्मा, वाराणसी (१९८०)।
४) शब्दशक्तिप्रकाशिका (जगदीशतर्कालङ्कारविरचिता), श्री अतुलकृष्णदेवशर्मणा प्रकाशिता (प्र. सं.)।
५) परमलघुमञ्जूषा (नागेशभट्टविरचिता), सं० जयशङ्करलाल त्रिपाठी, वाराणसी (१९८५)।
६) व्यक्तिविवेकः (श्रीमहिमभट्टप्रणीतः), सं० रेवाप्रसादद्विवेदी, वाराणसी (१९८२)।


* * *

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते ।
अ० = अष्टाध्यायी । वा० = वार्तिकम्

अतिक्रमणम् निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिः अतिक्रमणम्
अ० अतिरतिक्रमणे च 1.4.95

पदार्थः पदान्तरस्याप्रयुज्यमानस्य अर्थः पदार्थः ।
अ-अपि पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु 1.4.96

सम्भावनम् सम्भावनम् अधिकार्थवचनेन शक्तेः अप्रतिघाताविष्करणम् ।

अन्ववसर्गः अन्ववसर्गः कामचारानुज्ञा ।

गर्हा गर्हा निन्दा ।
अ० अपिः पदार्थसम्भावनान्वसर्गगर्हासमुच्चयेषु 1.4.96

ईश्वरः ईश्वरः स्वामी ।
अ० अधिरीश्वरे 1.4.97

प्रहासः प्रहासः परिहासः क्रीड़ा ।
अ० प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च 1.4.106

परः परशब्दः अतिशये वर्त्तते ।

सन्निकर्षः सन्निकर्षः प्रत्यासत्तिः ।
(वर्णानाम् अर्धमात्राकालव्यवधानं परः सन्निकर्षः)
अ० परः सन्निकर्षः संहिता 1.4.109

विरामः विरतिः विरामः, विरम्यतेऽनेनेति वा विरामः ।
अ० विरामोऽवसानम् 1.4.110

विधिः विधीयते इति विधिः ।

पदविधिः पदानां विधिः ।

समर्थः विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः अथवा समर्थपदाश्रयत्वात् समर्थः ।
अ० समर्थः पदविधिः 2.1.1

समृद्धिः समृद्धिः ऋद्धेराधिक्यम् । अ० अव्ययं विभक्ति० 2.1.6



# भासनाटकेषु प्राकृतिकबिम्बानां विमर्शः

विनय कुमार पाण्डेयः

प्राच्यचिन्तनानि बौद्धिक-भावात्मक-संस्थानानि च पाश्चात्यसम्पर्कैः प्रभावितानि सन्ति । समयसापेक्षानां नव्यसिद्धान्तानां ग्रहणं हि युगधर्मः । अतएव पाश्चात्यालोचनायां महत्तमं स्थानमलङ्कुर्वाणं काव्यबिम्बम् (Poetic Image) अद्यत्वे साहित्यालोचनायाः निकषमिति केचन विबुधाः ख्यापयन्ति । वस्तुतः बिम्बस्यार्थः कल्पनायां स्मृतौ वा उपस्थितं चित्रं प्रकृतिर्वा ।[1] मानसिक-पुनर्निर्माणमिति मनौवैज्ञानिकाः । समासतः कस्यचिदमूर्तविचारस्य भावनायाः वा पुनर्निर्मितिरेव बिम्बम् । अतः काव्येषु निरूपितबिम्बेषु चित्रात्मकता एवञ्च इन्द्रियगम्यता आवश्यकी । एतैरेवोपादानैः कवेः कथ्यानां सार्थकी अभिव्यञ्जना भवितुमर्हति । कविभिः जीवने प्रत्यक्षीकृताः अनुभवाः एव बिम्बरूपेण स्फुटिताः भवन्ति । तस्मादेव कवेः वैशिष्ट्यं व्यक्तित्वं वापि अवगन्तुं शक्यते । इह हि महाकविभासविरचितेषु नाटकेषु प्राकृतिकबिम्बानां विमर्शः क्रियते ।

महाकविभासस्य बिम्बग्रहणक्षेत्रं विस्तृतं वर्तते । अतोऽध्ययनसुकराय कविनोपस्थापितानि बिम्बानि द्विधा विभक्तुं शक्नुमः-i)-प्राकृतिकबिम्बानि तथा च ii)-मानवीयबिम्बानि । अत्र प्राकृतिकबिम्बानां विमर्शः अभीष्टः इत्यतः अस्मिन् खण्डे महाकविभासस्य प्रकृतिगततत्त्वैः यानि बिम्बानि प्रस्तूयन्ते तेषां विभागः एवं विद्यते-ऋतवः बेलाश्च, आकाशः, वायुः, तेजः, जलं पृथिवीत्यादयः । अथ च समेकितसमीक्षाऽत्रोपस्थाप्यते ।

नाटककारोऽयं महाकविभासः कथ्यानुरूपं प्रकृतिचित्रणं विदधाति । सीमितपरिधौ अपि प्रसङ्गानुरूपं यच्चित्रं कविना निरूपितं तेन चकितहृदय-सहृदयाः सुतरामाह्लादिताः भवन्ति । वन्यप्रान्तस्य सन्ध्यायाः वर्णनमिदं कस्य मनो न हरति-

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।
परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ।।[2]

अत्र कविना स्पष्टमालेखितं यत् खगाः नीडमगच्छन्, तपस्विनः स्नान्ति, प्रज्वलितोऽग्निः शोभते, धूमः तपोवनं व्याप्नोति, अयं सूर्योऽपि निजरथं निरुध्य शनैः शनैरस्ताचलमेति । नूनमेव सन्ध्या समागता । अपरत्राभिषेकनाटकस्यापि सूर्यास्तं दर्शनीयम् अस्ताद्रिमस्तकगतः प्रतिसंहृतांशुः .......।[3] पुनश्च, अविमारके सन्ध्यायाः रात्र्यागमनस्यापि चित्रं श्लाघ्यं हृद्यञ्च ।[4] रात्र्यन्धकारस्य चित्रमुपस्थापयन् कविः कुत्रचित् आकाशात् अञ्जनवर्षायाः[5] तु क्वापि गहनवनमिव घनान्धकारस्य कल्पनां विधाय[6] सहृदयान् चमत्करोति । चारुदत्ते चन्द्रोदयस्य वर्णनक्रमे कविः प्रस्तौति यत् सिक्तखर्जूर इव शुभ्रः, युवतिजनानां सहायकः, राजमार्गस्य प्रदीपः चन्द्रोऽयमुदेति ।[7]

समुद्रवर्णने कवेः कल्पना तादृशी प्रतीयते यत् जलीयजीवोपेतः, नीलाम्बुदनिभः वीचिमालयुतः समुद्रः दृष्टिपथे समायाति ।[8] त्वन्यत्र पार्थिवबिम्बानि इत्थं दृश्यन्ते -

'आक्रान्ता गुरुभिर्धराधरवरैः संक्षोभितैः पार्थिवै-
र्भूमिश्चागतसम्भ्रमेव युवतिस्तस्मिन् क्षणे कम्पिता ।।[9]

अत्रार्जुनस्य प्रतिज्ञाकारणात् कौरवविजयानन्दातिरेकेण राजानस्तथा सिंहनादञ्चक्रुः येन युवतीव पृथ्वी चकम्प । पृथिव्याः कम्पनत्वादन्ये पार्थिवा अपि तथैव सम्भ्रमाः दृश्यन्ते । मेघबिम्बस्य चित्रमालिखन् कविः एवं वदति -

जलदसमयघोषणाडम्बरानेकरूपक्रियाजम्भका वज्रभृद्गृष्टयो-
भगणयवनिकास्तडित्पन्नगीवासवल्मीकभूतानभोमार्गरूढक्षुपाः।
मदनशरनिशानशैलाः प्ररुष्टाङ्गनासन्धिपाला गिरिस्नापनाम्भोघटाः
उदधिसलिलभैक्ष्यहारा रवीन्द्रर्गला देवयन्त्रप्रपा भान्ति नीलाम्बुदाः ।।[10]



एते मेघाः दृश्यमानाः सन्तः वर्षाकालः समागतः इति घोषणामिव कुर्वन्ति, तत्क्रियाप्रवर्तकत्वेनात्र रूपिताः । अत्र मेघाः क्वचिदिन्द्र-गावः, नक्षत्रसमूहस्यावरणकरास्तु क्वापि मदनशराणां तीक्ष्णीकरणे शिलाराशिभूताः, देवैः प्रवर्तिताः यन्त्रचालिताः पानीयशाला इव गगने विभान्ति । मालारूपकालङ्कारेऽस्मिन् मेघानां बहुविधानि बिम्बानि कविना निरूपितानि ।

तपोवनस्याश्रमपदस्य वा बिम्बनिरूपणे कविः सजीवं चित्रमुपस्थापयन् एवं भणति-'स्थानप्राप्तविश्वासाः मृगाः विचरन्ति कुसुमसस्यैः पूर्णशाखाः वृक्षाः करुणापालिताः सन्ति, दिशाः क्षेत्ररक्षिताः यस्मात् कारणात् निस्सन्देहमिदं तपोवनमिति ।[11] आकाशे विहरन्त्यः वकपङ्क्तयः मनोहारिण्यः त्वन्यत्र रथवेगं चित्रयन् कविः रथेन सह निखिलं दृश्यमानं जगत् गतियुतं कर्तुमुत्सहते ।[12] अत्रोत्प्रेक्षासहकृता स्वभावोक्तिरलङ्कारः । एतद्रथवेगवर्णनं वीक्ष्य शाकुन्तलस्य रथवर्णनप्रसङ्गः स्मृतिपथे समायाति । किं बहुना, कालिदासेनापि भासवर्णितमिदं चित्रं दृष्टं स्यादिति सम्भावना ।

युद्धभूमेः यज्ञेन सह साम्यं तथा च युद्धभूमौ आकाशे परिव्याप्तानां गृध्राणां समूहः[13] प्रमाणीकरोति यत् चित्रालेखने विचक्षणः महाकविभासः विलक्षणः एव । अभिषेकनाटके लङ्कायाः सौन्दर्यचित्रणं सुतरामास्वाद्यम्-

कनकरचितचित्रतोरणाढ्या
मणिवरविद्रुमशोभितप्रदेशा ।
विमलविकृतसञ्चितैर्विमानै-
र्वियति महेन्द्रपुरीव भाति लङ्का ।।[14]

भासवर्णितेन लङ्कावर्णनेनैव समुत्प्रेरितः गोस्वामितुलसीदासः 'कनक कोट विचित्र मणिकृत' इति वर्णनं विदधातीति भाति । एतदतिरिच्य उपलक्षितबिम्बनिरूपणे कविः पशु-पक्षि-पुष्पाणां बहुशः उल्लेखं कृतवान् अस्ति । मूलतः उपलक्षितबिम्बेषु उक्तावयवाः अप्रस्तुतरूपेण वर्णिताः उल्लिखिताश्च सन्ति ।

निष्कर्षतः भासकृतनाटकेषु प्राकृतिकबिम्बानामतिव्यापकतायाः गणनाप्रसङ्गे त्रीणि तथ्यानि स्फुटन्ति-(i) मानवस्य प्रकृतेश्च सततं

संयोगः, (ii) कवेः सूक्ष्मावलोकनशक्तिः तथा च (iii) प्रकृतिं प्रति कवेः प्रेमाधिक्यम् । प्राकृतिकबिम्बनिरूपणे कविना उपमोत्प्रेक्षारूपकाद्यलङ्कारैः सह प्रसादपूर्णलालित्यशैली अनुसृता यस्मात् बिम्बेषु नैसर्गिकी सजीवता वरीवर्त्ति । कालिदासबाणादिपूर्ववर्ती कविरयं काव्येषु चित्रात्मकतायाः एकस्याः नव्यसरण्याः प्रवर्तकः उद्गमस्थलमिति निश्चप्रचम् ।

**सन्दर्भसूची**


१) चेम्बर्स ट्वेन्टिएथ सेन्चुरी डिक्शनरी
२) स्वप्नवासवदत्तम्, १/१६
३) अभिषेकनाटकम्, ४/२३
४) अविमारकम्, २/१२
५) चारुदत्तम्, १/१९
६) चारुदत्तम्, १/२०
७) चारुदत्तम्, १/२९
८) अभिषेकनाटकम्, ४/१७
९) दूतघटोत्कचम्, १/२७
१०) अविमारकम्, ५/६
११) स्वप्नवासवदत्तम्, १/१२
१२) प्रतिमानाटकम्, ३/२
१३) उरुभङ्गम्, १/६, १/११
१४) अभिषेकनाटकम्, २/२


* * *



**पुस्तकसमीक्षा**

# शतदलम्

समीक्षकः - अरुण कुमार मिश्रः

काव्यसङ्ग्रहः-शतदलम्, कविः - डॉ० रवीन्द्र कुमार पण्डा, प्रकाशकः - परममित्र प्रकाशन डी पॉकेट - 214, दिलशाद गार्डेन, दिल्ली - 110095 (भारत) प्रकाशनवर्षम् - 2002, पृष्ठानि - 177, मूल्यम् - 200/= रुप्यकाणि ।

आधुनिककाव्यरचयितृषु कवेः डॉ० रवीन्द्र कुमार पण्डा महोदयस्य 'शतदलम्' (संस्कृतकाव्यसङ्ग्रहः) सुतरां वीक्ष्य मोदमनुभवति अयं जनः। काव्यसङ्ग्रहे कर्मसाधनया जीवनदर्शनस्य सहजपक्षः कविना उद्घाटितः। प्रतिशतकं कविताः जीवनस्य शाश्वतसत्यं निरूपयन्ति । आदौ शारदाशतकं लिखित्वा कविना शारदायाः कृपया एव कवितायाः सर्वाणि कार्याणि कल्पितानि । अत्र अन्यानि शतकानि अपि लिखितानि । यथा-स्वतंत्रशतकप्रियाशतकोत्कलशतकसंस्कृतशतकजीवनशतकाद्वैतशतकानि च इतोऽपि अनुकूललहरीचक्रवातश्च लिखितः कविना । कविनोक्तं यत् कदा प्रवृत्तिः भविष्यति कदा निवृत्तिः सत्यमसत्यञ्च । यथा-

जानामिसत्यं न कदा प्रवृत्तिः ।
जानाम्यसत्यं न कदा निवृत्तिः ।।

विनम्रहृदयेन कविनादौ शारदां संस्तूयते । अत्र काव्यकौशलस्य शिल्पस्य च चारुता दरीदृश्यते । शाश्वत कर्मोपादानैः आत्मज्ञानस्य प्रस्तुतिः एवाष्टशतकानां मूलाधारः मूलस्वरः वा । विषयवैविध्येन रचितेषु शतकाख्येषु काव्येषु कविः माधुर्यपूर्णपदविन्यासैः मानवजीवनमनुशास्ति ।

सत्यमिति परमं पवित्रं संसारे । भारतशतकमिति अस्यां कवितायां कवेः राष्ट्रिया धार्मिकी च भावना मुखरितास्ति । शारदाशतके घोरविपिने गहनान्धकारे सदा विमलं प्रकाशे सुखे च मधुरमुण्डनशुभाङ्गी, वेदेषुधर्मवचनेषु च सर्वत्र सर्वविधिना गदिताञ्च तां सकलशास्त्रमयीं शारदां नमाम्यहं या दीनदुःखं हरति । उत्कलराज्यस्य कटकस्थाने कटकीचण्डी तथा च भुवनेश्वरे लिङ्गराजस्य विशालं मन्दिरं जनानां हृदि आस्थाम् उत्पादयतः । साहित्यसङ्गीतक्षेत्रे नृत्ये नाट्ये शिल्पकार्ये स्थापत्यकौशलकलाविद्यासु च जनानां मनांसि अनिर्वचनीयं सुखं प्राप्नुवन्ति ।

एकस्मिन् पक्षे स्वतंत्रता विमुक्तिं ददाति परञ्च कुत्रचित् विमुक्तेः अभावः । यथा-अत्र सादरं हन्ति कन्याभृण, स्वयौवनाय, स्वसुखाय पुत्रं स्तन्यपानाय न प्रसन्ना सा स्वतंत्रता स्वतंत्रताशतकमिति मध्ये श्लोकस्य-निरूपणसमये लेखकः संस्कृतशब्देन सह आङ्ग्लभाषायाः संक्षिप्तरूपमपि प्रददाति -

टिभिश्च........................सकलाऽर्थहीना ।

स्वतंत्रशब्दस्यायमर्थः यत् न स्वार्थाय सर्वे नियमा विधेया अपितु यथेच्छं सत्त्वयुतं कार्यं करणीयमेव । तात्पर्यमिदं भविष्यति अत्र नियमा विनष्टाः विनाशकाले । लोके कुत्रापि विश्वासशब्दः नास्ति, विश्वास योग्योऽपि न च जन्तुः । अतः स्वतंत्रतायाः भावः कः ? तस्य लोकेऽभावः । अधुना लोके सिंहासनार्थं समरः कूटनीतिः विभेदभावः पुरुषार्थाश्च निश्चिताः भवन्ति परञ्च अधुना अर्थेन विना कार्ये सफलतामपि न मिलिष्यति ।

भारते अनेकानि राज्यानि सन्ति किन्तु, उत्कलराज्यस्य विशिष्टता भिन्ना । अस्य राज्यस्य नामेति श्रीक्षेत्रमिति काव्यसङ्ग्रहे कथयति कविः । यत्र तीर्थक्षेत्रं पवित्रपापनाशिनी पुण्या वैतरणी तथा यज्ञपूरीति शान्ताऽपि प्रवहतः नद्यौ अत्र । पुरी नगरी समग्रभूतले प्रसिद्धा यत्र श्यामो मर्यादा पुरुषोत्तमः निवसति । वीरमातृकापि तत्रैव निवसति ।

संस्कृतशतकस्य षोडशश्लोके ब्रह्मविद्यापराविद्याधर्मविद्यायाश्च वर्णनं कृतं तथापि तेनलिखितम् -



केवलं संस्कृता विद्या भारतोद्धारणे क्षमा ।
भारतस्य विकाशाय प्रकाशाय च संस्कृतम् ॥

इतोऽपि लिखितं कविना -

भविष्यति भविष्यति किं संस्कृतस्य भारते ।
चिन्तया व्यथिताः प्राणा यथार्थं न च दृश्यते ॥

जीवनशतकेऽपि कविना लिखितम् -

सुखं हि मया दत्तं दुःखं तयैव भारत ।
सुखदुःखे समीकृत्य...................॥

कथयत्यत्र कविः निश्चितरूपेण जीवनं जटिलं वस्तु, न च केऽपि दोषाः जनानामत्र । मूलतः व्यवहारो मूलभावः । अस्मिन् काव्ये मूलकारणं प्रकृतिः इति मन्यते । यो भवति प्रकृत्या सह कर्मणा । एकोप्यभावः विद्यते तर्हि पूर्णरूपेण कार्यं न सिद्धं भवति । चक्रवातान्ते इति उक्तं कविना -

सृष्टिस्थितिप्रलयानां कारणं मूलप्रकृतिः ।
संसारं सृजति प्रेम्णा विनाशयति तां स्थितम् ॥

प्रायशः कवितायाः मूले मानवजीवनस्य कश्चिदेको पक्षो विचारश्च न विद्यमानः भवति । कवितामाध्यमेन तु तत्पक्षस्य मानवभावनायाः वा उद्घाटनमेवात्र सञ्जातम् । मानवजीवनस्य एतद् उद्घाटनं प्रत्यक्षतः वैयक्तिकविकासाय भवति । विविधतत्त्वानां प्रधानतायाः दृष्ट्या युगविशेषस्य देशस्य वा सभ्यतासंस्कृत्यादीनामवलोकनं वर्णनैः संवादैश्च विधीयते ।

एतस्याः कवितायाः सङ्ग्रहस्यानुशीलनेन कानिचन वैशिष्ट्यानि अवलोक्यन्ते । तद्यथा अल्पसमासप्रयोगः नूतनशब्दनिर्माणं लयानां मञ्जुलमङ्गलप्रयोगश्च । अस्मिन् काव्यसंकलने पण्डामहोदयस्य काव्यप्रयोगः नैसर्गिकतया प्राचीनप्रकृतभावरक्षणम् इव भाति । रागात्मकता अतीव श्लाघ्या वर्तते । कवितासु प्रवाहः सततं रसोद्रेकश्च मनो हरति । तथ्योपस्थापनस्य कलायां प्रवीणोऽयं कविः सर्वथा भावगाम्भीर्यं रक्षति । इतरे च मुद्रणदोषाः यद्यपि पुस्तकस्यान्ते शुद्धिपत्रं संवलितमस्ति, तथापि काव्यमपकुर्वन्ति ते आगामिसंस्करणे कविना संशोध्याः सन्ति इत्याशास्यते ।

* * *

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते । अ० = अष्टाध्यायी । वा० = वर्तिकम्

व्यृद्धिः व्यृद्धिः ऋद्धेरभावः ।

अर्थाभावः अर्थाभावो वस्तुनोऽभावः ।

अत्ययः अत्ययो भूतत्वमतिक्रमः ।

असम्प्रति असम्प्रति उपभोगस्य वर्त्तमानकालप्रतिषेधः ।

शब्दप्रादुर्भावः शब्दप्रादुर्भावः प्रकाशता शब्दस्य ।

आनुपूर्व्यम् आनुपूर्व्यम् अनुक्रमः ।

यौगपद्यम् यौगपद्यम् एककालता ।

सादृश्यम् सादृश्यं तुल्यता ।

संपत्तिः संपत्तिरनुरूप आत्मभावः समृद्धेः अन्यः ।

साकल्यम् साकल्यमशेषता ।

अन्तः अन्त इति परिग्रहापेक्षया समाप्तिरुच्यते । इयं समाप्तिः असकलेऽप्यध्ययने भवतीति साकल्यात् पृथगुच्यते ।

अ० अव्ययं विभक्ति० 2.1.6

अवधारणम् अवधारणम् इयत्तापरिच्छेदः । इयतो भाव इयत्ता, परिमाणम्, तस्याः परिच्छेदो निश्चयः ।

अ० यावदधारणे 2.1.8

मात्रा मात्रा बिन्दु स्तोकमल्पमिति पर्यायाः ।

अ० सुप्प्रतिना मात्रार्थे 2.1.9

लक्षणम् लक्षणं चिह्नम् ।

अ० लक्षणेनाभिप्रती आभिमुख्ये 2.1.14

समया समया समीपम् ।

अ० अनुर्यत्समया 2.1.15



# फार्म-४

**नियमः ८ द्रष्टव्यः**

1. प्रकाशनस्थानम् : आरा (विहारः)
2. प्रकाशनस्य अवधिः : अर्धवार्षिकम्
3. मुद्रकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, आरा
4. प्रकाशकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
5. सम्पादकस्य नाम : डॉ० गोपबन्धु मिश्रः
   किमसौ भारतस्य नागरिकः ? : एवम्
   सङ्केतः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)
6. तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः : संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः)

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम [illegible]तमस बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति ।

ह० गोपबन्धु मिश्रः
सम्पादकः